ॐ

॥ सिद्धान्तकल्पवल्ली ॥

केसरवल्ल्याख्यया व्याख्यया
सहिता

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरम-
शिवेन्द्रसरस्वतीपादाब्जसेवापरायण
श्रीसदाशिवेन्द्रसरस्वत्या
विरचिता ।



श्रीरङ्गस्थ
श्रीवाणीविलासमुद्रायन्त्रालये
संमुद्रिता ।
१९१०.

Copyright. *Registered.*

॥ ओम् ॥

॥ सिद्धान्तकल्पवल्ली ॥

अङ्कुरितबोधमुद्रिक-
मपसव्योरूपरिस्थसव्यपदम् ।
वस्त्वेकमनुसरामो
वटभूरुहमूलवास्तव्यम् ॥ १ ॥

स्वाज्ञानेन विवर्तितत्रिभुवनाकारेण यः सर्वतः
स्वस्मै यः स्वयमेव चोपदिशति स्वं शिष्यगुर्वात्मना ।
स्वज्ञानेन च योऽद्वितीयसुखसद्बोधात्मना शिष्यते
तस्मै विस्मयनीयशक्तिनिधये कस्मैचिदस्मै नमः ॥

सिद्धान्तलेशसंग्रहाख्यग्रन्थे वर्णितानां मतानां सुखेनावधारणार्थं चिकीर्षितस्य सिद्धान्तकल्पवल्ल्याख्यग्रन्थस्य निष्प्रत्यूहपरिपूरणाय कृतमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति— अङ्कुरितेति । अङ्कुरिता स-

ज्ञाताङ्कुरा स्फुरन्ती बोधमुद्रिका यस्य तत्तथोक्तम्, अपसव्यस्य दक्षिणस्य ऊरोरुपरि तिष्ठतीति उपरिस्थं सव्यं **वामं** पदं पादः यस्य तत्तथोक्तम्, एतेन वीरासनासीनत्वमुक्तं **भवति**। वटभूरुहस्य वटवृक्षस्य मूले वसतीति वास्तव्यम्। '**वसेस्तव्यत्कर्तरि**' इति कर्तरि तव्यत्प्रत्ययः। तदेकं **अव्यपदेश्यं** श्रीदक्षिणामूर्तिरूपं वस्तु अनुसरामः उपास्महे इत्यर्थः॥ १॥

वदनतदधोविभाग-
व्यञ्जितमातङ्गमानवाभेदम्।
मदनारिभागधेयं
महिमानं वयमुपास्महे कमपि॥ २॥

'श्रेयांसि बहुविघ्नानि' इति प्रसिद्धेः परमश्रेयःसाधनीभूते ग्रन्थे बहुतरविघ्नसंभावनया तन्निवर्तनसमर्थं श्रीविघ्नराजानुसंधानरूपं मङ्गलान्तरमारचयति— **वदनेति**। वदनं मुखं तस्य अधोविभागः अधस्तनावयवसंघातः ताभ्यां व्यञ्जितः ज्ञापितः मातङ्गमानवयोः गजनरयोः अभेदो यस्य स तथोक्तः, मुखे गजरूपोऽन्यत्र नररूप इति यावत्। मदनारेः परमशिवस्य भागधेयं भाग्यरूपं कमपि निरुपाख्यम्। श्रीविघ्नराजात्मकं महिमानं वयं उपास्महे भजामह इत्यर्थः॥ २॥

यदपाङ्गितः प्रबोधो
भवदुःस्वप्नावसानकरः ।
तमहं परमशिवेन्द्रं
वन्दे गुरुमखिलतन्त्रजीवातुम् ॥ ३ ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इत्यादिश्रुतेर्गुरूपदिष्टानुपदिष्टसकलार्थावगतिर्गुरुभक्त्यधीनेति गुरुं नमस्करोति— यदिति । यदपाङ्गितः येनापाङ्गितः कटाक्षितः । प्रबोधः जीवब्रह्मैक्यसाक्षात्कारः । भवदुःस्वप्नावसानकरः भवः संसारः मिथ्यापरिकल्पितः स एव दुःस्वप्नः सकलानर्थभाजनत्वात् तस्यावसानकरः सवासनोच्छेदकरः, ज्ञानेनाज्ञानोच्छेदे तत्कार्यसंसारोच्छेदस्यावश्यंभावित्वात् । एवं च सविलासाज्ञानोच्छेदक्षमसाक्षात्कारः यत्कटाक्षैकलभ्यः तं अखिलतन्त्रजीवातुम् अखिलानि यानि तन्त्राणि दर्शनानि तेषां जीवातुं उज्जीवकम्, सर्वेषां तन्त्राणां परमतात्पर्येणाद्वितीयब्रह्मावसायित्वस्य तत्र तत्र स्वकृतग्रन्थेषु स्थापितत्वात् । एतादृशं परमशिवेन्द्रं श्रीगुरुम् अहं वन्दे नमस्करोमीत्यर्थः ॥

सिद्धान्तलेशसंग्रह-
वर्णितनानामतावधानाय ।

हृद्यैरहं कतिपयैः
पद्यैः संदर्भयामि कृतिमेताम् ॥ ४ ॥

चिकीर्षितं प्रतिजानीते—सिद्धान्तेति । हृद्यैः बह्वर्थसूचकसरलपदगुम्भितत्वेन मनोहरैः । एतां चिकीर्षितत्वेन बुद्धिस्थां कृतिं सिद्धान्तकल्पवल्ल्याख्यामित्यर्थः ॥ ४ ॥

---

१. विधिवादः ।

इह खलु शान्त्यादिमतः
प्रत्यग्ब्रह्मैक्यबोधसंपत्त्यै ।
आत्मा श्रोतव्य इति
श्रुतो विधिः किंविधो ग्रहीतव्यः ॥ ५ ॥

तत्र प्रथमं समन्वयाध्यायार्थं दिदर्शयिषुरादौ साधनचतुष्टयसंपन्नस्यापातप्रतिपन्नब्रह्मात्मभावस्य तज्जिज्ञासोस्तज्ज्ञानाय 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यत्र प्रतीयमानस्य विधेः प्रकारप्रश्नमाह—इहेति। तत्र त्रयो हि विधयः सन्ति अपूर्वः नियमः परिसङ्ख्या चेति । तत्र विना वचनं कथमपि अप्राप्तस्य प्राप्तिफलको

विधिराद्यः, यथा व्रीहीन् प्रोक्षतीति । पक्षप्राप्तस्याप्राप्तांशस्य परिपूरणफलको विधिर्द्वितीयः, यथा व्रीहीनवहन्तीति । उभयत्रैकस्य उभयोर्वा एकत्र युगपत्प्राप्तौ अन्यतरनिवृत्तिफलको विधिस्तृतीयः, यथा अग्निचयनेऽश्वगर्दभरशनयोर्ग्रहणे युगपदनुष्ठेये सामर्थ्याविशेषेण युगपत्प्राप्तस्य 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रस्य 'इत्यश्वाभिधानीमादत्ते' इति गर्दभरशनाग्रहणस्य व्यावृत्तिमात्रफलको विधिः ; यथा वा 'पञ्चपञ्चनखा भक्ष्याः' इति च । एवं त्रिप्रकारेषु तेषु श्रवणविधिः किंप्रकार आश्रयणीय इत्यर्थः ॥ ५ ॥

अत्र प्रकटार्थकृतः
श्रवणं ब्रह्मापरोक्षहेतुतया ।
अप्राप्तमतो विधिरय-
मपूर्व एवेति मन्यन्ते ॥ ६ ॥

वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुतया कुत्राप्यप्राप्तं प्रमाणान्तरेण । कृतश्रवणस्यापि कस्यचित् तदनुदयेनाकृतश्रवणस्यापि वामदेवादेस्तदुदयेन चान्वयव्यतिरेकाभ्यां व्यभिचारदर्शनात्, श्रवणमात्रं श्रोतव्यार्थसाक्षात्कारहेतुरिति सामान्यनियमस्य कर्मकाण्डश्रवणे व्यभिचाराच्च । अतोऽप्राप्तत्वादयमपूर्वविधिरेवेति मतेनोत्तरमाह— **अत्रेति** ।

वेदान्तश्रवणमिदं
नाप्राप्तं किं तु पक्षतः प्राप्तम् ।
नियमविधिरेष तस्मा-
दित्याहुर्विवरणाचार्याः ॥ ७ ॥

ननु वेदान्तश्रवणं नित्यापरोक्षब्रह्मसाक्षात्कारहेतुतया नाप्राप्तम्, अपरोक्षवस्तुविषयप्रमाणस्य साक्षात्कारहेतुत्वेन, विचारस्य विचार्यनिर्णयहेतुत्वेन च विचारितवेदान्तशब्दज्ञानरूपस्य श्रवणस्य तद्धेतुत्वप्राप्तेः । न चोक्तव्यभिचारः, सहकारिविरहेणान्वयव्यभिचारस्यादोषत्वात्, जन्मान्तरश्रवणात् फलसंभवेन व्यतिरेकव्यभिचाराभावाच्च । अतो नापूर्वविधिरिति अपरितोषान्मतान्तरमाह— **वेदान्तेति** । नियमविधिरेवायम्, तद्विद्धयभावे मनोगोचरे स्वस्मिन् श्रुतिबोधितसूक्ष्मतमविशेषावधारणाय मनस एव सप्रणिधानं व्यापारे तच्छास्त्रश्रवणेऽपि मेधाविनो गुरुनिरपेक्षवेदान्तविचारे मन्दव्युत्पन्नस्य भाषाप्रबन्धश्रवणे प्रवृत्तिप्रसक्तिरस्तीति साधनत्वस्य भ्रान्तिप्राप्तेर्मनःप्रणिधानादिभिर्गुर्वधीनाद्वितीयवस्तुपरवेदान्तश्रवणं पक्षतः प्राप्तमित्यतो नियमविधिरित्यर्थः ॥ ७ ॥

केचित्परोक्षमेव
ज्ञानं शब्दादुदेति पश्चात्तु ।

तस्मान्मननादियुता-
दपरोक्षज्ञानमत्र नियम इति ॥ ८ ॥

प्रथमं शब्दान्निर्विचिकित्सं परोक्षज्ञानमेवोदेति पश्चान्मननादिसहितात्तस्मादेव शब्दादपरोक्षज्ञानम्, भावनाप्रचयस्य बाह्यार्थासमर्थे विधुरचित्ते कामिनीसाक्षात्कारसामर्थ्याधायकत्वकल्पेः । एवं च परोक्षज्ञान एव प्रागुक्तरीत्या पाक्षिकत्वप्राप्तौ नियमविधिरिति मतान्तरमाह— केचिदिति ।

साक्षात्कारे करणं
विमलं मन एव न तु शब्दः ।
शब्दः परोक्षमात्रे
तस्मात्तत्रैव नियम इत्यपरे ॥ ९ ॥

अत्रापरोक्षज्ञाने 'मनसैवानुद्रष्टव्यम्' इत्यादिश्रुतेः शास्त्राचार्योपदेशसंस्कृतं मन एव साक्षात्कारे करणम्, न तु शब्दः । शब्दस्तु परोक्षमात्रे । तस्मात्तत्रैव पूर्ववन्नियमविधिरिति मतान्तरमाह— साक्षादिति ।

भवतु मन एव साक्षा-
त्कारे करणं तथापि तत्रैव ।

सहकारितया श्रवणं
नियम्यते न तु परोक्ष इत्येके ॥ १० ॥

अस्तु नाम साक्षात्कारे मन एव करणम्, तथापि प्रकाशमाने वस्तुन्यारोपिताविवेकनिवारकशास्त्रसद्भावे तच्छ्रवणं तत्साक्षात्कारकरणसहकारीति नियमस्य श्रोत्रसहकारिणि षड्जाद्यविवेकनिरासके गान्धर्वशास्त्रे कल्पत्वात्। 'द्रष्टव्यः श्रोतव्यः' इति दर्शनमुद्दिश्य श्रवणविधानात्तत्रैव साक्षात्कारकरणीभूतमनःसहकारितया श्रवणं नियम्यत इति मतान्तरमाह— **भवतु मन एवेति ॥ १० ॥**

संक्षेपाचार्यास्तु
श्रवणं न ज्ञानफलकमेवं च।
पुरुषापराधशान्त्यै
नियम्यते श्रवणमित्याहुः ॥ ११ ॥

श्रवणं नाम न विचारितवेदान्तशब्दज्ञानरूपम्, ज्ञानस्याविधेयत्वात्; किंतु ऊहापोहात्मकमानसक्रियारूपम्। तच्च न परोक्षादिज्ञानफलकम्, ज्ञानस्य प्रमाणफलत्वात्। एवं च तात्पर्यनिर्णयद्वारा तात्पर्यभ्रमरूपपुरुषापराधशान्त्यर्थत्वेन श्रवणं नियम्यत इति मतान्तरमाह— **संक्षेपाचार्यास्त्विति।**

पुरुषापराधनिरासः फलम्; द्रष्टव्य इति दर्शनार्थत्वेन स्तुतिमात्रम्, न श्रवणफलकीर्तनमिति भावः ॥ ११ ॥

श्रवणमनुतिष्ठतः स्या-
दन्यत्रापि क्वचित्प्रवृत्तिरिति।
तद्व्यावृत्तिफलां परि-
संख्यामभिदधति वार्तिकाचार्याः ॥ १२ ॥

ब्रह्मज्ञानार्थं वेदान्तश्रवणं कुर्वतश्चिकित्साज्ञानार्थं चरकादिग्रन्थे प्रवृत्तस्येव मध्ये मध्ये व्यापारान्तरेऽपि प्रवृत्तिः प्रसज्येतेति तन्निवृत्तिफलकः परिसङ्ख्याविधिरिति मतान्तरमाह— **श्रवणमिति**। 'ब्रह्मसंस्थोऽमृतत्वमेति' 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' इति व्यापारान्तरप्रतिषेधश्रवणादिति भावः ॥ १२ ॥

वेदान्तवाक्यजन्यो
बोधः श्रवणं तदत्र मानफले।
का वा कथा विधीना-
मिति वाचस्पतिमतानुगाः प्राहुः ॥ १३ ॥

'आत्मा श्रोतव्यः' इत्यात्मविषयत्वेन निबध्यमानमागमाचार्योपदेशजन्यमात्मज्ञानमेव श्रवणम्, न तु विचाररूपम्।

तस्मादत्र प्रमाणफले श्रवणे न कोऽपि विधिः प्रवर्तते, अयोग्यत्वात्, शिलादौ क्षुरधारेव, इति मतान्तरमाह— **वेदान्तेति**। एवं च श्रवणविद्धयभावात्कर्मकाण्डविचारवद्ब्रह्मकाण्डविचारोऽप्यध्ययनविधिमूलक इति भावः ॥ १३ ॥

---

२. कारणत्ववादः ।

जगदुत्पत्तिस्थितिलय-
हेतुत्वं ब्रह्मणः श्रुतावुक्तम् !
तल्लक्षणत्रयमिति
प्रसाधयन्ति स्म कौमुदीकाराः ॥ १४ ॥

इत्थं जिज्ञासासूत्रविषयपरिशोधनात्मकं विधिवादं समाप्य इदानीं जन्मादिसूत्रविषयं परिशोधयितुमाह— **जगदिति** । 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतौ जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमुक्तम् । तत्राप्येकैककारणत्वमनन्यगामीति तल्लक्षणत्रयमित्यर्थः ॥ १४ ॥

केचिदभिन्ननिमित्तो-
पादानत्वस्य लाभाय ।

इदमेकमेव लक्षण-
मस्येति प्राहुराचार्याः ॥ १५ ॥

उत्पत्तिस्थितिकारणत्वस्य निमित्तसाधारण्यात् लयकारणत्वमात्रोक्तावुपादानकारणत्वसिद्धावपि निमित्तत्वासिद्धेरभिन्ननिमित्तोपादानत्वसिद्ध्यर्थमिदमेकमेव लक्षणमिति मतान्तरमाह— केचिदिति । अस्य जगत इत्यर्थः ॥ १५ ॥

अस्योपादानत्वं
विश्वाकृत्या विवर्तमानत्वम् ।
तत्र विवर्तः स्वासम-
सत्ताकतदन्यथाभावः ॥ १६ ॥

अत्रोपादानत्वं न परमाणुवदारम्भकत्वम्, एकत्वात् । नापि प्रकृतिवत्परिणामित्वम्, अविकारित्वात् । किं तु अविद्यया वियदादिविश्वाकारेण विवर्तमानत्वमित्याह— अस्येति । विवर्तलक्षणमाह— तत्रेति । विवर्त इति लक्ष्यनिर्देशः । उपादानविषमसत्ताकत्वे सति अन्यथाभावत्वं लक्षणमिति दिक् ॥ १६ ॥

अथ किमिहोपादानं
शुद्धं किमुतेश्वरोऽथ जीवो वा ।

अत्राहुः संक्षेपा-
चार्यास्तच्छुद्धमेवेति ॥ १७ ॥

इत्थं लक्षणे निर्णीते लक्ष्यं पृच्छति— **अथेति** । जन्मादिसूत्रतद्भाष्ययोरुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेः शाखाचन्द्रस्थले तटस्थलक्षणेनापि लक्ष्यसिद्धिदर्शनाच्छुद्धमेवोपादानमिति संक्षेपशारीरकमतेनोत्तरयति— **अत्रेत्यादिना** । तथा च 'आत्मन आकाशः संभूतः' इति श्रुतौ शबलवाचिन आत्मपदस्य शुद्धे लक्षणेति भावः ॥ १७ ॥

विवरणमतैकनिष्ठा
यः सर्वज्ञ इति वचनमवलम्ब्य ।
मायाशबलः सर्ववि-
दीश्वर एवैतदित्याहुः ॥ १८ ॥

'यः सर्वज्ञः सर्ववित्' इत्यादिश्रुत्यवष्टम्भेन सर्वज्ञत्वादिविशिष्टो मायाशबलः सर्ववित् ईश्वर एवोपादानमिति मतान्तरमाह— **विवरणेति** । तथा च संक्षेपशारीरकग्रन्थोऽपि विशिष्टनिरासपरत्वेनानुकूलो व्याख्यातुं शक्य इति भावः ॥ १८ ॥

वियदादावीशोऽन्तः-
करणमुखे द्वौ तु जीवेशौ ।

योनिरिति संगिरन्ते
मायाविद्याभिदाविदः केचित् ॥ १९ ॥

'एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' इति कलाशब्दवाच्यप्राणान्तःकरणादीनां विदुषः प्रायणे जीवाश्रितविद्याकार्यभूतसूक्ष्मपरिणामत्वाभिप्रायेण विद्ययोच्छेद उक्तः । 'गताः कलाः पञ्चदशप्रतिष्ठाः' इति श्रुत्यन्तरे ईश्वराश्रितमायाकार्यमहाभूतपरिणामत्वाभिप्रायेण प्रतिष्ठाशब्दितमहाभूतेषु लयोक्तेश्च अन्तःकरणादौ जीवेशावुभावप्युपादानम्, वियदादौ त्वीश्वर एवेति मायाविद्याभेदवादिषु केषांचिन्मतमाह— वियदिति ॥ १९ ॥

अन्तःकरणप्रभृतेः
स्वाविद्यामात्रपरिणतत्वेन ।
स्याज्जीव एव योनि-
स्तत्रेति तदेकदेशिनः प्राहुः ॥ २० ॥

यथा वियदादेः ईश्वराश्रितमायापरिणामत्वेन तत्रेश्वर एवोपादानम्, तथा अन्तःकरणादेर्जीवाविद्यामात्रपरिणतत्वेन तत्र जीव एवोपादानम्; 'गताः कला' इति श्रुतिस्तु म्रियमाणे तत्त्वविदि पार्श्वस्थाः भूतेषु लयं पश्यन्तीति परदृष्टयभिप्रा-

येति कलाप्रलयाधिकरणभाष्ये स्पष्टत्वादित्यभिप्रेत्य तदेकदेशिमतमाह— अन्तःकरणेति ॥ २० ॥

तद्भेदवादिमध्ये
केचिज्जीवे तदध्यासात् ।
अन्तःकरणादीनां
जीवोपादानतामाहुः ॥ २१ ॥

अन्तःकरणादौ जीवतादात्म्यस्यानुभवाद्ध्यासभाष्ये जीव एव तदध्यासवर्णनाज्जीव एवोपादानमिति मायाविद्ययोरभेदवादिष्वेकदेशिमतमाह— तद्भेदेति ॥ २१ ॥

इतरे तु संगिरन्ते
यावद्व्यवहारसिद्धविश्वस्य ।
ब्रह्मैवोपादानं
जीवस्तु प्रातिभासिकस्येति ॥ २२ ॥

'एतस्माज्जायते प्राणः' इत्यादिश्रुतेर्व्यावहारिकाशेषप्रपञ्चस्य ब्रह्मैवोपादानम्, जीवस्तु प्रातिभासिकस्य स्वप्नप्रपञ्चस्य चेति मतान्तरमाह— इतरे त्विति । ब्रह्मणो जगदुपादानत्वे कात्स्न्र्येन जगदाकारपरिणामे जगद्व्यतिरेकेण ब्रह्माभावप्रसङ्गः । तदेकदेशेन तदुक्तौ निरवयवत्वश्रुतिव्याकोप इत्याक्षे-

पपरिहारायाश्रिते विवर्तवादे तन्निवर्तनार्थं 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रेण जैवस्वप्नसर्गस्य सिद्धवत्कारादिति भावः ॥ २२ ॥

स्वस्मिन्नेव स्वप्नव-
दीशानत्वादिसर्वकल्पनया ।
जीवः सर्वविकारो-
पादानमिति ब्रुवन्त्यन्ये ॥ २३ ॥

'पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम्' इति श्रुतेर्जीव एव स्वप्नसृष्टगजादिवत् स्वस्मिन्नेवेश्वरत्वादि सर्वकल्पकत्वेन सर्वप्रपञ्चोपादानमिति मतान्तरमाह— स्व-स्मिन्नेवेति ॥ २३ ॥

अथ तत्त्वनिर्णयकृतः
परिणामितया विवर्तमानतया ।
माया ब्रह्म च विश्वो-
पादानं श्रुतित इत्याहुः ॥ २४ ॥

ननु उक्तरीत्या ब्रह्मण एव जगदुपादानत्वे 'मायां तु प्रकृतिं विद्यात्' इत्यादिश्रुतेः का गतिरित्याशङ्क्य श्रुतिद्वयानुरोधात् कार्ये सत्ताजाड्योभयधर्मानुवृत्तिदर्शनाच्च ब्रह्म विवर्तोपादानं

माया तु परिणाम्युपादानमिति मतेनोत्तरमाह— अथेति । अत एव स्वाभिन्नकार्यजनकत्वमुपादानलक्षणमुभयसाधारणमिति भावः ॥ २४ ॥

संक्षेपाचार्यास्तु
ब्रह्मैवाशेषजगदुपादानम् ।
द्वारतया मायायाः
कार्येष्वनुवृत्तिरित्याहुः ॥ २५ ॥

ब्रह्मैव सकलजगदुपादानम्, कूटस्थस्य स्वतः कारणत्वायोगेन मायाद्वारा । माया तु द्वारकारणम् । तस्या अपि कार्येष्वनुवृत्तिः संभवति । मृच्छलक्षणताया घटादावनुवृत्तिदर्शनादिति मतान्तरमाह— संक्षेपाचार्यास्त्विति ॥ २५ ॥

वाचस्पतिमिश्रास्तु
स्वत एव ब्रह्म जगदुपादानम् ।
सहकारिण्यपि माया
न कार्यमनुगच्छतीत्याहुः ॥ २६ ॥

जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानम् । माया तु सहकारिमात्रम् । तथाविधापि न कार्यमनुगच्छतीति मतान्तरमाह—

वाचस्पतीति । माया न द्वारकारणं अनुपादानगतत्वात् । किं तु सहकारिमात्रम् । अतो न कार्यमनुगच्छतीति भावः ॥

मायैवोपादानं
ब्रह्म तदाधारभूततया ।
गौण्योपादानमिति
प्राहुर्मुक्तावलीकाराः ॥ २७ ॥

अत्र मतद्वयेऽपि 'मायां तु प्रकृतिं विद्यात्' इत्यादौ प्रकृतिशब्दो गौणः स्यादिति मतान्तरमाह— **मायैवेति** । मायैव मुख्यया वृत्त्योपादानम् । ब्रह्म तु उपादानमायाधारतया गौण्योपादानम्, न मुख्यतः । 'न तस्य कार्यं करणं च विद्यते' इति श्रुतेस्तन्निषेधपरत्वात् । इत्यतस्तादृशमेवोपादनत्वं लक्षणमिति भावः ॥ २७ ॥

---

३. जीवेश्वरस्वरूपनिर्णयवादः ।

जीवेशयोः स्वरूपं
निरूप्यतेऽस्यामविद्यायाम् ।
चित्प्रतिबिम्बो जीवो
मायायां तावदीश इति ॥ २८ ॥

इत्थं मतभेदेन जीवेश्वरावुपादानमिति व्यवस्थाप्य तयोः स्वरूपं निरूपयितुमाह— जीवेति ॥ २८ ॥

मूलप्रकृतिर्माया
तस्याः शक्तिद्वयोपेतः ।
अंशो भवेदविद्ये-
त्युक्तं प्रकटार्थविवरणग्रन्थे ॥ २९ ॥

मायाविद्ययोः स्वरूपं दर्शयति— मूलेति । अनाद्यनिर्वाच्या चित्संबन्धिनी मूलप्रकृतिर्माया । तस्या एवैकदेशो विक्षेपावरणशक्तिमानविद्येत्यर्थः ॥ २९ ॥

तत्त्वविवेके तूक्तं
सत्त्वे न रजस्तमोभ्यां च ।
एकैव मूलयोनि-
र्मायाविद्या च भवतीति ॥ ३० ॥

'माया चाविद्या च स्वयमेव भवति' इति श्रुतेः सत्त्वरजस्तमोगुणात्मिकैव मूलप्रकृतिः प्रधानभूतेन सत्त्वेन माया, प्रधानभूताभ्यां रजस्तमोभ्यामविद्या च भवतीति मायाविद्यास्वरूपं मतान्तरेण दर्शयति— तत्त्वेति ॥ ३० ॥

एका मूलप्रकृति-
र्विक्षेपावरणशक्तिभेदेन ।

मायाविद्येति भिदां
यातीत्युपपादितं क्वचिद्ग्रन्थे ॥ ३१ ॥

एकैव मूलप्रकृतिर्विक्षेपशक्तिप्राधान्येन माया, आवरणशक्तिप्राधान्येनाविद्येति मतान्तरमाह — **एकेति** ॥ ३१ ॥

संक्षेपके त्वविद्या
चित्प्रतिबिम्बो भवेदीशः ।
तत्कार्यान्तःकरणे
चित्प्रतिबिम्बस्तु जीव इत्युक्तम् ॥ ३२ ॥

'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इति श्रुतिमाश्रित्य मतान्तरमाह — **संक्षेपके त्विति** । अविद्याचित्प्रतिबिम्बः अविद्यायां चित्प्रतिबिम्बः इत्यर्थः ॥ ३२ ॥

धीवासनोपरक्ता-
ज्ञानं धीश्चेत्युपाधियुगे ।
प्रतिबिम्बौ जीवेशा-
विति भेदश्चित्रदीपोक्तः ॥ ३३ ॥

ब्रह्माश्रिते सकलप्राणिधीवासनोपरक्तेऽज्ञाने प्रतिबिम्बितचैतन्यमीश्वरः, स्थूलसूक्ष्मदेहद्वयाधिष्ठानकूटस्थकल्पितेऽन्तःकरणे प्रतिबिम्बितं चैतन्यं जीव इति तयोर्भेदं मतान्तरेण दर्श-

यति— धीवासनेति । उपाधियुगे उपाधिद्वये जीवेशाविति व्युत्क्रमेणान्वयः ॥ ३३ ॥

विवरणदर्शनमेतद-
विद्याप्रतिबिम्बलक्षणो जीवः ।
तद्बिम्बभूत ईश-
स्तस्मादुभयोर्विभाग इति ॥ ३४ ॥

जीवो नान्तःकरणप्रतिबिम्बः, योगिनां कायव्यूहे प्रदीपवदावेशः, 'तथाहि दर्शयति' इत्यधिकरणभाष्येऽन्तःकरणभेदे सत्यपि जीवभेदाभावस्योपपादितत्वात् । ईश्वरोऽपि नाविद्याप्रतिबिम्बः, तत्पारतन्त्र्यापत्तेः । किंत्वविद्याप्रतिबिम्बलक्षणो जीवः, तत्प्रतिबिम्बभूतः ईश्वरः इति तयोर्विभाग इति मतान्तरमाह— विवरणेति ॥ ३४ ॥

वाचस्पतिमतरीति-
स्त्वन्तःकरणेन यद्धयवच्छिन्नम् ।
चैतन्यं तज्जीवः
स्यादनवच्छिन्नचैतन्यमीश इति ॥ ३५ ॥

ईश्वरो जीवश्च न प्रतिबिम्बः, नीरूपत्वेन चैतन्यस्य प्रतिबिम्बायोगात्, सलिले गगनप्रतिबिम्बस्य भ्रान्तिमात्र-

त्वात् । किं तु घटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवः, तदनवच्छिन्नं चैतन्यं त्वीश्वर इति मतान्तरमाह— **वाचस्पतीति** । अन्तःकरणेन यदनवच्छिन्नं चैतन्यं तदीश इत्यन्वयः ॥ ३५ ॥

वार्तिककृन्मतमित्थं
न प्रतिबिम्बो न चाप्यवच्छिन्नः ।
ब्रह्मैवाविद्यातः
संसरतीवाथ मुच्यत इवेति ॥ ३६ ॥

ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यत इति बृहदारण्यकभाष्योक्तेः, जीवो न प्रतिबिम्बः नाप्यवच्छिन्नः ; किं तु व्याधकुलसंवर्धितराजकुमारवदविकृतमेव ब्रह्माविद्यया संसरति विद्यया विमुच्यत इवेति मतान्तरमाह— **वार्तिककृदिति** । एवं च न परमार्थे बन्धमुक्ती स्तः, 'न निरोधो न चोत्पत्तिर्न बद्धः' इत्यादिनेत्यर्थः ॥ ३६ ॥

---

४. जीवैकत्वनानात्ववादः ।

अथ जीवः किमु नाना
किमुतैकस्तत्र जीव एकोऽसौ ।

एकं वपुः सजीवं
तद्भिन्नं स्वप्नतुल्यमिति केचित् ॥ ३७ ॥

एवं जीवधर्मिणि निर्णीते तद्धर्मिसंख्याविषये संशयमुपन्यस्यानुपदोक्तमतानुसारेण द्वितीयं पक्षं दर्शयति—अथेति। एको जीवः तेन चैकमेव शरीरं सजीवं तदन्यच्छरीरजातं स्वप्नदृष्टशरीरजातवन्निर्जीवमित्यर्थः। तदीयः सर्वोऽपि व्यवहारः स्वाप्निकव्यवहारवदुपपद्यत इति भावः ॥ ३७ ॥

एको हिरण्यगर्भो
ब्रह्मप्रतिबिम्ब एव स्यात्।
अन्ये तत्प्रतिबिम्बा
जीवाभासा भवेयुरित्यपरे ॥ ३८ ॥

'यः सर्वज्ञः' इत्यादिश्रुतिप्रामाण्यात् बिम्बभूतब्रह्मसृष्ट एव प्रपञ्चः। तत्र प्रथम उपाधौ ब्रह्मणः प्रतिबिम्बो हिरण्यगर्भ एव मुख्यो जीवः। अन्ये तु तत्प्रतिबिम्बभूताश्चित्रपटलिखितमनुष्यदेहार्पितपटाभासकल्पा जीवाभासा इति सविशेषानेकशरीरैकजीवपक्षमाह— **एक** इति। एकः मुख्य इत्यर्थः ॥ ३८ ॥

एको जीवः सर्वं
स्वशरीरं मन्यते तदपि।

सुखदुःखसङ्करोऽस्मिन्
शरीरभेदान्न संभवीत्येके ॥ ३९ ॥

हिरण्यगर्भाणां प्रतिकल्पं भेदात् कतमो हिरण्यगर्भो मुख्य इत्यत्र विनिगमकाभावादेक एवाविशेषेण योगीव सर्वं स्वशरीरमभिमन्यते । तथात्वे त्वस्मिन् पक्षे न परस्परसुखाद्यनुसंधानं प्रसज्यते शरीरभेदात्, जन्मान्तरीयसुखाद्यनुसंधानवदिति मतान्तरमाह— **एक इति** । सुखदुःखसङ्करः सुखदुःखाद्यनुभव इत्यर्थः ॥ ३९ ॥

इतरे त्वन्तःकरणो-
पाधिभिराश्रित्य जीवनानात्वम् ।
श्रुत्यैव बन्धमुक्ति-
व्यवस्थितिं प्रत्यपद्यन्त ॥ ४० ॥

अस्मिन्नेकजीववादे बन्धमुक्तिव्यवस्थाया असिद्धेः अन्तःकरणोपाधिभेदेन जीवनानात्वमाश्रित्य 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' इति श्रुतिदर्शितबन्धमुक्तिव्यवस्थितिं प्रतिपन्नानां केषांचिन्मतमाह—**इतरे त्विति** ॥ ४० ॥

तेषु च केचिदवोच-
न्ब्रह्माश्रयविषयमेकमज्ञानम् ।

अंशेन तस्य नाशे
मुक्तिर्भवतीति तद्व्यवस्थेति ॥ ४१ ॥

एकमेवाज्ञानं ब्रह्माश्रयविषयकम्, तस्य च तांस्तान् जीवान्प्रति ब्रह्मावारकाभागा भिद्यन्ते। एकैकस्य जीवस्य ज्ञानोदयेनाज्ञाननाशे बन्धनिवृत्त्या मुक्तिरिति बन्धमुक्तिव्यवस्थामुपगच्छतां जीवभेदवादिष्वेकदेशिनां मतमाह— तेषु चेति ॥

हृदयग्रन्थिनियम्यो
ऽविद्यासंसर्गलक्षणो बन्धः।
हृदयग्रन्थिविनाशे
विनश्यतीति व्यवस्थितिं केचित् ॥ ४२ ॥

न्यायैकदेशिमतेऽत्यन्ताभावस्य भूतलादिवृत्तित्वे प्रतियोगिसंसर्गाभाव इवाविद्यायाश्चैतन्यवृत्तित्वे हृदयग्रन्थिर्नियामकः, 'भिद्यते हृदयग्रन्थिः' इति श्रुतेः। ज्ञानेन हृदयग्रन्थिविनाशे प्रतियोगिसंसर्गोदये भूतले घटात्यन्ताभावस्य संसर्ग इवाविद्यायाश्चित्संसर्गरूपो बन्धो नश्यतीत्याशयेन बन्धमुक्तिव्यवस्थितिं मतान्तरेणाह— हृदयेति ॥ ४२ ॥

जीवाश्रयमज्ञानं
जातिर्नष्टामिव व्यक्तिम्।

तत्त्वविदं त्यजतीतर-
माश्रयतीति व्यवस्थितिं केचित् ॥ ४३ ॥

न ब्रह्माश्रयमज्ञानम्, किं तु जीवाश्रयम् । तच्च प्रतिजीवं परिसमाप्य वर्तमानं नष्टां व्यक्तिं जातिरिव तत्त्वविदं त्यजति । स एव मोक्षः । अन्यं यथापूर्वमाश्रयतीति तद्व्यवस्थां मतान्तरेणाह— जीवाश्रयमिति ॥ ४३ ॥

प्रतिजीवमविद्याया
भेदं स्वीकृत्य केचिदेतस्याः ।
अनुवृत्तिनिवृत्तिभ्या-
मुपपन्ना सा व्यवस्थेति ॥ ४४ ॥

नानाविद्यापक्षेऽपि बन्धमुक्तिव्यवस्थां केषांचिन्मतेनाह— प्रतिजीवमिति ॥ ४४ ॥

नन्वेतस्मिन्पक्षे
कस्याविद्याकृतः प्रपञ्चः स्यात् ।
विनिगमकाभावादिह
सर्वाविद्याकृतः स इत्येके ॥ ४५ ॥

नन्वस्मिन् पक्षे कस्याविद्यया प्रपञ्चः कृतोऽस्त्वित्याशङ्क्य विनिगमनाविरहात् सर्वाविद्याकृतः अनेकतन्त्वारब्धपटवदि-

ति केषांचिन्मतेनोत्तरमाह —नन्विति । एवं चैकतन्तुनाशे महापटस्येव तत्साधारणजगतो नाशे शेषतन्तुभिः पटान्तरस्येव जगदन्तरस्योत्पत्तिरिति भावः ॥ ४५ ॥

अन्ये तु संगिरन्ते
तत्तदविद्याविनिर्मितं विश्वम् ।
प्रतिपुरुषमेव भिन्नं
भवति यथा शुक्तिरजतमिति ॥ ४६ ॥

तत्तदज्ञानकृतप्रातिभासिकरजतादिवत् तत्तदविद्याकृतः प्रपञ्चः प्रतिपुरुषं भिन्न एवेति मतान्तरमाह—अन्ये त्विति । शुक्तिरजते त्वया यद्दृष्टं तदेव मयापीत्यैक्यप्रत्ययोर्भ्रममात्रमिति भावः ॥ ४६ ॥

जीवगताज्ञानचया-
द्भिन्ना मायेश्वराश्रिता जगतः ।
योनिर्जीवाविद्या-
स्त्वावरणायेति जगुरेके ॥ ४७ ॥

जीवाश्रिताविद्यानिवहाद्भिन्नेश्वराश्रिता मायैव प्रपञ्चस्य कारणम् । जीवानामविद्यास्त्वावरणमात्रे प्रातिभासिकशुक्तिरजतादिविक्षेप इवोपयुज्यन्त इति मतान्तरमाह—जीवगतेति ॥ ४७ ॥

५. कर्तृत्ववादः ।

अथ कीदृगीश्वरस्य
प्रपञ्चकर्तृत्वमिह केचित् ।
कार्यानुकूलभूत-
ज्ञानचिकीर्षादिमत्त्वमिति ॥ ४८ ॥

इत्थं लक्षणोपोद्घाते लक्ष्यैकदेशमुपादानत्वं विचार्य तदेकदेशं कर्तृत्वं कीदृशमिति प्रश्ने 'तदैक्षत' 'सोऽकामयत' 'तदात्मानꣳस्वयमकुरुत' इति श्रवणात् न्यायमत इव कार्यानुकूलज्ञानचिकीर्षाकृतिमत्वं तदिति केषांचिन्मतेनोत्तरमाह— अथ कीदृगिति । ज्ञानं चिकीर्षा च ते आदी यस्याः कृतेः सा ज्ञानचिकीर्षादिः, कार्यं प्रत्यनुकूलभूता या ज्ञानचिकीर्षादिः तद्वत्त्वं कर्तृत्वमित्यर्थः ॥ ४८ ॥

अन्ये तु तदनुकूल-
ज्ञानाश्रयतैव कर्तृतेत्याहुः ।
इतरे तु तदनुकूल-
स्रष्टव्यालोचनाश्रयत्वमिति ॥ ४९ ॥

इच्छाकृत्योरपि कार्यत्वेनात्माश्रयात्तयोरिच्छाकृत्यन्तरेण कर्तृत्वं चेत् अनवस्थानात् कार्यानुकूलज्ञानवत्त्वमेव ब्रह्मणः

कर्तृत्वमिति मतान्तरमाह— अन्ये त्विति । न च ज्ञानस्यैष प्रसङ्गः, तस्य ब्रह्मरूपत्वेनाकार्यत्वादिति भावः । न च कार्यानुकूलब्रह्मरूपज्ञानवत्त्वमीश्वरस्य कर्तृत्वम्, तस्य जीवं प्रत्यविशेषेण जीवस्यापि तत्प्रसङ्गात् । कार्यानुकूलस्रष्टव्यालोचनात्मकज्ञानवत्त्वं तदिति मतान्तरमाह— इतरे त्विति ॥

---

६. ईश्वरस्य सर्वज्ञत्ववादः ।

ननु जगतः कर्तृत्वा-
क्षिप्तं सार्वज्ञ्यमीश्वरस्य कथम् ।
जीववदन्तःकरणा-
भावेन ज्ञातृतायोगात् ॥ ५० ॥

ननु जगत्कर्तृत्वेनाक्षिप्तं शास्त्रयोनित्वेन च समर्थितमीश्वरस्य सर्वज्ञत्वं कथं संगच्छताम् ? जीववदन्तःकरणाभावेन ज्ञातृत्वाभावादिति शङ्कते—ननिवति ॥ ५० ॥

अत्र प्राणिगताखिल-
गोचरधीवासनैकसाक्षितया ।
सार्वज्ञ्यमीश्वरस्य
प्रसाधयन्ति स्म भारतीतीर्थाः ॥ ५१ ॥

सर्ववस्तुविषयकप्राणिधीवासनोपरक्ताज्ञानोपाधिः ईश्वरः, अतस्तस्य प्राणिगतसर्वविषयकधीवासनासाक्षितया सर्वज्ञत्वमिति भारतीतीर्थानां मतेन समाधत्ते— अत्रेति ॥ ५१ ॥

चित्प्रतिबिम्बग्राहक-
मायावृत्त्येश्वरस्यापि ।
सर्वज्ञतोपपन्ने-
त्याहुः प्रकटार्थकाराद्याः ॥ ५२ ॥

यथान्तःकरणवृत्त्या जीवस्य ज्ञातृत्वम्, एवमीश्वरस्यापि चित्प्रतिबिम्बग्राहकसात्त्विकमायावृत्त्या त्रैकालिकसकलपदार्थगोचरापरोक्षज्ञानाश्रयत्वेन सर्वज्ञत्वमुपपन्नमिति मतान्तरमाह— चिदिति ॥ ५२ ॥

स्रष्टव्यालोचनया
साक्षात्कृत्या तदुत्थसंस्मृत्या ।
त्रैकालिकधीमत्वात्
सार्वज्ञ्यं तत्त्वशुद्धिकृत आहुः ॥ ५३ ॥

भूतभाविनोर्मायावृत्त्यसंभवादापरोक्ष्यासंभवं संभावयतः पुरुषान्प्रति मतान्तरमाह— स्रष्टव्येति । स्रष्टव्यालोचनयेति तृतीया धान्येन धनवानितिवदभेदविषया द्रष्टव्या । तथा चालोचनात्मकत्रैकालिकवस्तुविषयकधीमत्वादित्यर्थः ॥ ५३ ॥

स्वेनैव ज्ञानेन
स्वनिष्ठसर्वावभासकत्वेन ।
सर्वज्ञत्वमितीत्थं
समर्थयन्ति स्म कौमुदीकाराः ॥ ५४ ॥

आत्मस्वरूपज्ञानेनैव ब्रह्मणः स्वाध्यस्तसर्वप्रपञ्चावभासकत्वात् सार्वज्ञ्यमिति मतान्तरमाह—स्वेनैवेति । चित्रभित्तौ विमृष्टानुन्मीलितचित्रयोरिव स्वरूपे सूक्ष्मरूपेणातीतानागतयोरपि सत्त्वादिति भावः ॥ ५४ ॥

अत्र च सर्वज्ञत्वं
सर्वज्ञानस्वरूपतेत्येके ।
दृश्यावच्छिन्नस्व-
ज्ञानं प्रति कर्तृता तदित्यपरे ॥ ५५ ॥

अत्र सर्वावभासकज्ञानस्वरूपत्वमेव सार्वज्ञ्यम्, न तु ज्ञानकर्तृता; 'वाक्यान्वयात्' इत्यधिकरणभाष्ये ज्ञानकर्तृताया जीवलिङ्गत्वोक्तेरिति केषांचिन्मतमाह— अत्रेति । अत्र शङ्कायामित्यर्थः । चितः कार्योपहितरूपेण कार्यत्वात् कर्तृता सुवचेति वाचस्पतिमिश्राणां मतमाह— दृश्येति ॥ ५५ ॥

---

७. जीवाल्पत्ववादः ।

नन्वीश्वरो यथा किल
वृत्त्यनपेक्षः स्वरूपभासैव ।
विषयानवभासयति
स्याज्जीवोऽप्येवमित्यत्र ॥ ५६ ॥

ननु ईश्वर इव जीवोऽपि वृत्त्यनपेक्षस्वरूपचैतन्येन विषयान् कुतो नावभासयतीति शङ्कते— **नन्विति ॥ ५६ ॥**

विषयासंसर्ग्यपि स-
न्नन्तःकरणेन संसृष्टः ।
विषयोपरागसिद्ध्यै
जीवस्तावत्समीहते वृत्तिम् ॥ ५७ ॥

ब्राह्मणः सर्वोपादानतया स्वसंसृष्टं सर्वमवभासयति ; जीवस्त्वविद्योपाधिकतया सर्वगतोऽपि न सर्वविषयैः संसृज्यते, अनुपादानत्वात् । तथाविधोऽपि सन् व्यक्तौ जातिरिव अन्तःकरणेन संसृष्टो वृत्तिद्वारा विषयं व्याप्नोतीति विषयैः संबन्धसिद्ध्यर्थं वृत्तिमपेक्षत इति विवरणोक्तं परिहारमाह— **विषयेति ॥ ५७ ॥**

विषयावच्छिन्नचिता-
भेदाभिव्यक्तिसिद्धयेवायम् ।
जीवोऽन्तःकरण-
परिच्छिन्नतया वृत्तिमभिलषति ॥ ५८ ॥

अन्तःकरणोपाधिकत्वेन जीवः परिच्छिन्नः तत्संसर्गाभावान्न विषयमवभासयति । वृत्तिद्वारा स्वसंसृष्टविषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ तु तं विषयमवभासयतीति तत्सिद्धयर्थं वृत्तिमपेक्षत इति तदुक्तमेव परिहारान्तरमाह— **विषयेति** ॥ ५८ ॥

अथवा घटादिविषया
ज्ञानावरणाभिभूतये जीवः ।
द्वारीकरोति वृत्तिं
त्रेधेत्थं विवरणे परीहारः ॥ ५९ ॥

जीवः सर्वगतोऽप्यविद्यावृतत्वात् स्वयमप्यप्रकाशमानतया विषयान्नावभासयन् विषयविशेषे वृत्त्युपरागादावरणतिरोधानेन तत्रैवाभिव्यक्तस्तमेव प्रकाशयतीति तदभिभवार्थं वृत्तिमपेक्षत इति तदुक्तमेव परिहारान्तरमाह— **अथवेति** ॥

८. संबन्धवादः ।

अत्र प्रथमे पक्षे
सर्वगतस्यापि जीवस्य ।
वृत्त्यायत्तः को वा
विषयैरुपराग इत्यत्र ॥ ६० ॥

इत्थं प्रदर्शितेषु पक्षेषु प्रथमं पक्षं प्रश्नव्याजेनाक्षिपति—अत्रेति । निष्क्रिययोर्भिन्नदेशीययोर्विषयचैतन्ययोस्तादात्म्यस्य संयोगस्य वा आधानासंभवादिति भावः ॥ ६० ॥

विषयविषयित्वमेवे-
त्याहुः केचित्परे तु जीवस्य ।
तादात्म्यापन्नाया
वृत्तेः संयोग एवेति ॥ ६१ ॥

स्वाभाविकविषयविषयिभाव एव संबन्ध इति मतेन समाधत्ते—विषयेति । न हि विषयविषयित्वं संबन्धः, अनुमित्यादौ वृत्त्यनिर्गमेऽपि बाह्यवह्न्यादिविषयतासत्त्वेन बहिर्निर्गमनकल्पनावैयर्थ्यापत्तेः । किंतु जीवतादात्म्यापन्नाया मनोवृत्तेर्विषयैः संयोगो जीवस्यापि तद्द्वारा परंपरासंबन्धो लभ्यत

इति । स एव चिदुपरागोऽभिमत इति मतान्तरमाह—परे त्वित्यादिना ॥ ६१ ॥

स्वावच्छेदकवृत्ते-
र्विषयैरुन्मिषति संयोगे ।
तज्जन्यः संयोगो
जीवस्यास्तीति जगुरेके ॥ ६२ ॥

साक्षात्प्रमातृसंबन्धे सत्येव सुखादेरापरोक्ष्यदर्शनात् प्रमात्रवच्छेदिकाया वृत्तेर्विषयैः संयोगे तदवच्छेदेन प्रमातुर्जीवस्यापि संयोगजसंयोगोऽस्तीति स एव चिदुपराग इति मतान्तरमाह—**स्वावच्छेदकेति** । कारणाकारणसंयोगात्कार्याकार्यसंयोगवत् कार्याकार्यसंयोगात्कारणाकारणसंयोगस्याप्यभ्युपगमादिति भावः ॥ ६२ ॥

अन्तःकरणोपहितो
जीवो विषयावभासकस्तस्य ।
विषयचिदैक्यद्वारा
विषयैस्तादात्म्यमेष इत्यपरे ॥ ६३ ॥

अन्तःकरणोपहितस्य विषयावभासकस्य जीवचैतन्यस्य

विषयतादात्म्यापन्नब्रह्मचैतन्यैक्याभिव्यक्तिद्वारा विषयतादात्म्यमेव चिदुपराग इति मतान्तरमाह— **अन्तःकरणेति** । न चैवं द्वितीयपक्षसांकर्यम् । जीवस्य सर्वगतत्वे प्रथमः पक्षः, परिच्छिन्नत्वे द्वितीयः इत्येवं तयोर्भेदसंभवादिति भावः ॥ ६३ ॥

---

९. अभेदाभिव्यक्तिवादः ।

का च द्वितीयपक्षे-
ऽभेदाभिव्यक्तिरत्राहुः ।
विषयावच्छिन्नान्तः-
करणप्रतिबिम्बचेतनैक्यमिति ॥ ६४ ॥

द्वितीयं पक्षं प्रश्नपूर्वकं निरूपयति— **का चेति** । तटाकेदारसलिलयोः कुल्याद्वारेव वृत्तिद्वारा विषयावच्छिन्नान्तःकरणप्रतिबिम्बचैतन्ययोरेकीभावोऽभेदाभिव्यक्तिरित्यर्थः ॥

वृत्तौ यः प्रतिबिम्बो
विषयावच्छिन्नचिद्व्यक्तेः ।
तस्यान्तःकरणपरि-
च्छिन्नचितैकत्वमित्यपरे ॥ ६५ ॥

बिम्बस्थानीयस्य विषयावच्छिन्नचैतन्यस्य वृत्तौ यः प्रतिबिम्बः तस्यान्तःकरणपरिच्छिन्नजीवचैतन्येनैकीभावोऽभेदाभिव्यक्तिरिति मतान्तरमाह— **वृत्ताविति** ॥ ६५ ॥

यच्चैतन्यं विषया-
वच्छिन्नं बिम्बभूतमेतस्य ।
बिम्बत्वोपहितस्यै-
कत्वं जीवेन सेत्यन्ये ॥ ६६ ॥

अस्तु वा बिम्बस्थानीयस्य विषयावच्छिन्नब्रह्मचैतन्यस्य चैतन्यात्मना उपलक्षितरूपेणैकीभावोऽभेदाभिव्यक्तिः । तथापि न जीवब्रह्मसांकर्यम्, न वा ब्रह्मणः सर्वज्ञत्वाभावापत्तिः, तस्य च बिम्बत्वविशिष्टरूपेण प्रतिबिम्बाद्भेदेऽपि तदुपलक्षितरूपेणाभेदात् । एवं च बिम्बत्वोपलक्षितस्य विषयावच्छिन्नबिम्बचैतन्यस्य जीवचैतन्येनैकीभावोऽभेदाभिव्यक्तिरिति मतान्तरमाह— **यच्चैतन्यमिति** ॥ ६६ ॥

---

१०. आवरणाभिभववादः ।

का वा तृतीयपक्षे-
ऽज्ञानावरणाभिभूतिरिह केचित् ।

अज्ञानांशविनाशः
कटवद्वेष्टनमथापसरणमिति ॥ ६७ ॥

तृतीयं पक्षं प्रश्नव्याजेनाक्षिपति— केति । आवरणाभिभवस्याज्ञाननाशरूपत्वे घटज्ञानेऽपि तन्नाशे मोक्षप्रसङ्ग इति भावः । चैतन्यमात्रावारकस्य मूलाज्ञानस्य विषयावच्छिन्नप्रदेशे खद्योतादिप्रकाशेन महान्धकारस्येव ज्ञानेनैकांशनाशो वा कटवत्संवेष्टनं वा भीतभटवदपसरणं वा अभिभव इति पक्षभेदेनोत्तरमाह— अज्ञानेति ॥ ६७ ॥

वृत्त्या संसृष्टं य-
द्विषयावच्छिन्नचैतन्यम् ।
तदनावारकताख्वा-
भाव्यं सेत्यामनन्त्येके ॥ ६८ ॥

अज्ञानस्यैकांशेन नाशे तद्विषये सकृदवगते समयान्तरेऽप्यावरणाभावप्रसङ्गात्, निष्क्रियस्य वेष्टनापसरणयोरसंभवाच्च न यथोक्तरूपोऽभिभवः, किंतु तत्तदाकारवृत्तिसंसृष्टावस्थविषयावच्छिन्नचैतन्यानावारकत्वस्वाभाव्यमेवाभिभूतिरिति मतान्तरमाह— वृत्त्येति ॥ ६८ ॥

मूलाज्ञानस्यैवा-
वस्थाभेदात्मकं किंचित् ।
अज्ञानान्तरमास्ते
तस्मात्तन्नाश एव सेत्यन्ये ॥ ६९ ॥

शुद्धब्रह्ममात्रावारकं मूलाज्ञानम् । तस्यैवावस्थाभेदरूपं विषयावच्छिन्नचैतन्यावारकमज्ञानान्तरमस्तीति तन्नाश एवाभिभव इति मतान्तरमाह— **मूलाज्ञानस्येति** । एवं च एकज्ञानेनाज्ञाननाशे ज्ञानान्तरवैयर्थ्यापत्त्या तन्नाश्यानेकाज्ञानान्यभ्युपगम्यन्त इति भावः ॥ ६९ ॥

---

११. अवस्थाज्ञानसादित्वानादित्ववादः ।

तच्चानेकमवस्था-
ज्ञानमनादीति केचिदिच्छन्ति ।
निद्रासुषुप्त्यवस्था-
साम्यात्सादीत्युदाहरन्त्यपरे ॥ ७० ॥

तच्चानेकमवस्थाज्ञानं मूलाज्ञानवदज्ञानत्वादनादीति केषांचित् मतमाह— **तच्चेति** । व्यावहारिकजगज्जीवावावृत्य

स्वाप्नजगज्जीवौ विक्षिपन्त्या निद्राया अज्ञानावस्थात्वं प्रसिद्धम् । सुप्तेरपि न किंचिदवेदिषमित्यनुभवस्य कादाचित्कत्वात्सादित्वम् । तत्साम्यादन्यदप्यज्ञानावस्थारूपं सादीत्यपरेषां मतमाह—**निद्रेत्यादिना** ॥ ७० ॥

नन्वज्ञानमनादी-
त्यस्मिन्पक्षे कियन्निवर्त्यं स्यात् ।
अत्र व्यवस्थयैक-
ज्ञानेनैकं निवर्त्यमित्येके ॥ ७१ ॥

अनादित्वपक्षे घटे प्रथमोत्पन्नज्ञानेन तदवच्छिन्नसर्वाज्ञाननाशे पुनरावरणानापत्तिः । एकतरनाशे विनिगमकाभाव इत्याशयेन शङ्कते— **नन्विति** । यथा न्यायनये सत्स्वप्यनेकेषु तद्विषयभ्रमसंशयादिहेतुज्ञानप्रागभावेष्वेकज्ञानेनैक एव प्रागभावो निवर्त्यते संशयादिनिवृत्तिर्विषयावभासश्च भवति, तथैकेन ज्ञानेनैकाज्ञानं निवर्तते संशयादिनिवृत्तिर्विषयावभासश्चेत्यभिप्रेत्य केषांचिन्मतेन परिहरति—**अत्रेत्यादिना** ॥

आवृण्वन्ति घटादिक-
मज्ञानानि क्रमेण न तु युगपत् ।

यद्यद्यदावृणोति
ज्ञानात्तत्तन्निवर्त्यमित्यपरे ॥ ७२ ॥

यावद्विशेषाभावकूटस्यैव संशयादिहेतुत्वेनैकेनापि ज्ञानेन तत्कूटविघटने संशयाप्रसक्त्या प्रागभाववैषम्यात् आवृतप्रकाशायोगादेकावृतेऽन्यस्यानुपयोगाच्च । अतोऽज्ञानानि क्रमेण घटादिकमावृण्वन्ति, न तु एकदा । तथा च यदा यद्यदज्ञानमावृणोति तदा ज्ञानात्तत्तदज्ञानमेव निवर्तत इत्यभिप्रेत्य मतान्तरमाह—आवृण्वन्तीति ॥ ७२ ॥

संततमेव समस्ता-
ज्ञानान्यावारकाणि विषयस्य ।
ज्ञानेनैकविनाशे
भवति परेषां तिरस्क्रियेत्यन्ये ॥ ७३ ॥

अज्ञानस्य सविषयत्वस्वाभाव्यादुत्सर्गतः सर्वतः सर्वदैव सर्वाज्ञानानि विषयस्यावारकाणि भवन्ति । तथा च ज्ञानेनैकाज्ञाननाशेऽन्येषां ज्ञानकाले तिरस्कारो भवति । संनिपातहरौषधेनैकदोषनाशे दोषान्तराणामिवेति मतान्तरमाह —संततमेवेति ॥ ७३ ॥

---

१२. धारावाहिकद्वितीयादिज्ञानवैफल्यपरिहारवादः ।

नन्वेवं सति धारा-
स्थले द्वितीयादिसफलता न स्यात् ।
प्रथमज्ञानेनैवा-
वरणाभिभवस्य सिद्धत्वात् ॥ ७४ ॥

एतन्मते धारावाहिकस्थले प्रथमज्ञानेनैव नाशतिरस्काराभ्यां सर्वावरणाभिभवस्य सिद्धत्वात् द्वितीयादिज्ञानानां विफलता स्यादिति शङ्कते— नन्विति ॥ ७४ ॥

अत्र प्रथमज्ञानति-
रस्कृतमज्ञानमुपरते तस्मिन् ।
पुनरावृणोति वृत्त्य-
न्तरोदयेनेति सफलतामाहुः ॥ ७५ ॥

प्राथमिकज्ञानतिरस्कृतमज्ञानं दीपतिरस्कृतं तम इव तस्मिन् ज्ञाने उपरते पुनरावृणोति। दीपान्तरस्येव ज्ञानान्तरस्योदये नावृणोति । किंतु तथैवावतिष्ठत इत्यावरणाभिभ-

वपरिपालकतया द्वितीयादिज्ञानानां सफलतास्तीति मतेनोत्तरमाह—अत्रेति ॥ ७५ ॥

अज्ञानानि हि तत्त-
त्कालिकविषयावृतिप्रगल्भानि ।
ज्ञानानि च स्वकाला-
वृतिनाशकराणि तेन तामपरे ॥ ७६ ॥

अज्ञानानि हि तत्तत्कालोपलक्षितविषयावारकाणि । ज्ञानानि च स्वकालोपलक्षितविषयावरणनाशकानि । तेन धारावाहिकद्वितीयादिज्ञानानामपि तत्तत्कालिकविषयावरणनाशकत्वेन सफलतेति मतान्तरमाह—**अज्ञानानीति** । ताम् सफलताम् ॥ ७६ ॥

आद्यज्ञानेन घटा-
द्यज्ञानं तदितरैस्तु विज्ञानैः ।
देशादिविशिष्टघटा-
द्यज्ञानं नाश्यमिति केचित् ॥ ७७ ॥

प्रथमज्ञानेन केवलघटाद्यज्ञानमेव निवर्तते । द्वितीयादिज्ञानैस्तु देशकालादिविशिष्टघटाद्यज्ञानमेव । अतस्तेषां सफलतेति मतान्तरमाह— **आद्येति** । अत एव सकृद्दृष्टे जाना-

म्येव चैत्रम्, इदानीं स केति न जानामीत्यनुभव इति भावः ॥ ७७ ॥

---

१३. परोक्षज्ञानस्याज्ञाननिवर्तकत्वा-निवर्तकत्ववादः ।

नन्वेष नास्ति नियमः
परोक्षवृत्तेरनिर्गत्या ।
विषयाज्ञाननिवर्तक-
भावायोगादिह प्राहुः ॥ ७८ ॥

ननु नायमपि नियमः परोक्षप्रमाणवृत्तिषु व्यभिचारादिति शङ्कते— नन्विति ॥ ७८ ॥

द्विविधं विषयाज्ञानं
विषयगतं पुरुषगतं चेति ।
तत्र च परोक्षवृत्त्या
पुरुषगतस्यैव तस्य नाश इति ॥ ७९ ॥

समाधत्ते— द्विविधमिति । विषयावारकमज्ञानं द्विविधम्, विषयाश्रितं पुरुषाश्रितं चेति । तत्र आद्यमावरणं विक्षेप-

कार्यानुमेयम्; द्वितीयं साक्षिसिद्धम्। तत्र परोक्षवृत्त्या आद्यस्य विप्रकर्षात् संनिहितस्य द्वितीयस्यैव नाश इत्यर्थः। शास्त्रार्थश्रवणानन्तरं स्वस्य तद्विषयकाज्ञाननाशानुभवादिति भावः॥

पुंगतमेवाज्ञानं
विक्षेपावरणकारणं तत्र।
आवरणांशविनाशो
वृत्त्या तावत्परोक्षयेत्येके॥ ८०॥

पुरुषाश्रितमेकमज्ञानमक्षिपटलमिव विप्रकृष्टविषयस्याप्यावरणविक्षेपहेतुः ब्रह्मण्यपि जीवकृताज्ञानविषयीकृते जगद्विक्षेपाभ्युपगमात्। तत्र परोक्षवृत्त्या आवरणांशस्यैव नाशमाह— **पुंगतमिति॥ ८०॥**

अपरे तु विषयमात्रा-
श्रितमिदमज्ञानमत्र नाशस्तु।
अपरोक्षरूपवृत्त्या
तस्मान्नियमो न भग्न इति॥ ८१॥

शुक्त्यादितादात्म्यापन्नरजताद्यनुभवोऽसत्यः स्यात्। तदुपादानमज्ञानं विषयगतं तदावारकम्। न चैवं सति तस्य

साक्षिसंसर्गाभावे तद्भास्यत्वं न स्यादिति वाच्यम् । तत्संसर्गाभावेऽप्यवस्थावस्थावतोरनतिभेदात् अवस्थावतो मूलाज्ञानस्य साक्षिसंसर्गमात्रेण तदवस्थारूपस्य तूलाज्ञानस्यापि साक्षिभास्यत्वोपपत्तेः । अस्य च नाशस्त्वपरोक्षवृत्त्यैव । अतः परोक्षवृत्तिषु न व्यभिचार इति मतान्तरमाह—**अपरे त्विति** । परोक्षवृत्त्या अज्ञाननाशानुभवस्तु अर्थसत्तानिश्चयपरोक्षवृत्तिप्रतिबन्धकप्रयुक्ताज्ञाननाशानुभवनिबन्धनो भ्रम इति भावः ॥ ८१ ॥

ननु नासावपि नियमः
सुखादिवृत्तेस्तु तदनिवर्तनतः ।
मैवं सुखदुःखादे-
र्न वृत्तिरस्त्यस्य साक्षिभास्यत्वात् ॥ ८२ ॥

सुखादिवृत्तेरज्ञाननिवर्तकत्वाभावाद्व्यभिचार इत्याशङ्क्य सुखादिवृत्तेः साक्षिभास्यत्वेन तत्र वृत्त्यनभ्युपगमान्न व्यभिचार इति परिहरति—**नन्विति** ॥ ८२ ॥

---

१४. साक्षिस्वरूपनिर्णयवादः ।

अथ कोऽयं साक्षीति
प्रश्ने कूटस्थदीपोक्तम् ।
तनुद्वयाधिष्ठानं
चैतन्यं यत्तु कूटस्थम् ॥ ८३ ॥

साक्षिणमेव सप्रश्नं निरूपयति—**अथेति** । देहद्वयाधिष्ठानभूतकूटस्थचैतन्यं स्वावच्छेदकदेहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यत इत्यर्थः ॥ ८३ ॥

नाटकदीपे साक्षी
जीवो नेति प्रदर्शितः स पुनः ।
नेशोऽपि किंतु शुद्धं
प्रत्यग्ब्रह्मेति तत्त्वदीपेऽपि ॥ ८४ ॥

कूटस्थदीपोक्तसाक्षी किं जीवकोटिः, उत ईश्वरकोटिरिति विशये, तन्निर्णयार्थमिदमाह—**नाटकेति** । नाटकदीपे यथा नृत्तशालास्थितो दीपः प्रभ्वादिकं प्रकाशयन् तदभावेऽपि प्रकाशते, एवं साक्षी जीवादिकं प्रकाशयन् सुषुप्तौ तदभावेऽपि प्रकाशत इति साक्षी न जीव इति दर्शितम् । तत्त्वदीपे-

ऽपि साक्षी न जीवः नापि ईश्वरः, 'केवलो निर्गुणश्च' इति श्रुतिविरोधात् । किं तु अस्पृष्टविभागं सर्वप्रत्यग्भूतं ब्रह्मेति दर्शित इत्यर्थः ॥ ८४ ॥

एको देव इति श्रु-
त्यनुरोधादीश्वरस्यैव ।
कश्चिद्भेदः साक्षी-
त्युपपादितमस्ति तत्त्वकौमुद्याम् ॥ ८५ ॥

'एको देवः' इति देवत्वश्रुतिविरोधात् परमेश्वरस्यैव कश्चिद्रूपभेदो जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीनः साक्षीति मतान्तरमाह— **एक इति** ॥ ८५ ॥

उक्तं हि तत्त्वशुद्धा-
विदमंशो रूप्यकोटिरिव ।
स ब्रह्मकोटिरेव
प्रतिभासाज्जीवकोटिरिति ॥ ८६ ॥

यथा इदं रजतमिति भ्रमस्थले वस्तुतः शुक्तिकोट्यन्तर्गतोऽपि इदमंशः प्रतिभासतो रजतकोटिः, रजताभिन्नः, तथा ब्रह्मकोटिरेव साक्षीति प्रतिभासतो जीवकोटिरिति मतान्तरमाह— **उक्तं हीति** ॥ ८६ ॥

केचिदविद्योपाधि-
र्जीवः साक्षीति भाषन्ते ।
अन्ये त्वन्तःकरणो-
पाधिर्जीवः स हीति मन्यन्ते ॥ ८७ ॥

अविद्योपाधिको जीवः साक्षाद्द्रष्टृत्वात् कर्तृत्वाद्यारोपभाक्त्वेऽपि स्वयमुदासीनत्वात् साक्षीति मतान्तरमाह— **केचिदिति** । 'एको देवः' इति श्रुतिस्तु वास्तवब्रह्माभेदाभिप्रायेति भावः । अविद्योपाधिको जीवो न साक्षी, पुरुषान्तरान्तःकरणादीनामपि पुरुषान्तरं प्रति स्वान्तःकरणभासकसाक्षिसंसर्गाविशेषेण प्रत्यक्षत्वापत्तेः । किंतु अन्तःकरणोपाधिको जीव एव स इति मतान्तरमाह—**अन्ये त्विति** । विशिष्टोपहितयोर्भेदस्य सिद्धान्तसंमतत्वादन्तःकरणविशिष्टः प्रमाता तदुपहितः साक्षीति विवेक इति भावः ॥ ८७ ॥

---

१५. अविद्यादीनामावृतानावृतसाक्षिचैतन्यप्रकाश्यत्ववादः ।

ननु चिन्मात्रावारक-
तमसा स्वयमावृतः साक्षी ।

स कथमविद्यादीना-
मवभासयिता भवेदिति चेत् ॥

ननूक्तरूपः साक्षी चैतन्यावारकाविद्यावृतः सन् कथमविद्यादिकमवभासयेदिति शङ्कते— **नन्विति** ॥ ८८ ॥

राहुच्छन्नश्चन्द्रो
राहुं यद्वत्प्रकाशयति ।
तमसावृतोऽपि साक्षी
तमः प्रकाशयति तद्वदित्याहुः ॥ ८९ ॥

राहुवदविद्या स्वावृतप्रकाशप्रकाश्येति मतेन परिहरति —**राहुच्छन्न इति** ॥ ८९ ॥

साक्ष्यवभास्यसुखादौ
संदेहादेरदर्शनतः ।
साक्षिणमपहाय तमो-
ऽन्यत्रैवावृतिकृदित्यपरे ॥ ९० ॥

वस्तुतस्तु साक्षिभास्याविद्याहंकारसुखादावावरणकार्यसंदेहाद्यदर्शनादज्ञानं साक्षिचैतन्यं विहायान्यत्र चैतन्ये आवरणं करोतीति मतान्तरमाह— **साक्षीति** ॥ ९० ॥

साक्षी चेदज्ञाना-
नावृतरूपो भवेत्तर्हि ।
तद्रूपोऽप्यानन्दः
संततमेव प्रकाशेत ॥ ९१ ॥

ननु साक्षिण्यावरणानभ्युपगमे तस्यानन्दरूपतापि भासेतेत्याशङ्क्य इष्टापत्त्या परिहरति श्लोकद्वयेन— **साक्षीति ॥**

इति चेदयमानन्दो
भासत एवात एव खलु ।
आत्मनि परमप्रेमा-
स्पदत्वमिति केचिदत्राहुः ॥ ९२ ॥

इति चेदिति । निगदव्याख्यानमेतत् ॥ ९२ ॥

आनन्दो मयि नास्ति न
भासत इत्यनुभवानुसारेण ।
आनन्दांशे साक्षिण
आवरणं केचिदाचख्युः ॥ ९३ ॥

अनुभवानुसारिणां मतमाह—**आनन्दो मयीति** । सुगममेतत् । साक्षिण्यविद्याकल्पितभेदेनावरणानावरणयोरविरोधादिति भावः ॥ ९३ ॥

---

१६. अहंकारादिस्मृतिसिद्ध्यर्थसंस्कारा-धानवादः ॥

नित्येन साक्षिणा त-
त्संस्कारोत्पादनायोगात् ।
तद्ग्राह्याहंकारा-
द्यनुसंधानं कथं भवेदिति चेत् ॥ ९४ ॥

ननु कथं साक्षिभास्याहंकारादीनामनुसंधानम्, नष्ट-ज्ञानसूक्ष्मावस्थानरूपसंस्कारस्य ज्ञाने सति अयोगेन नित्येन साक्षिणा तदाधानासंभवादिति शङ्कते— नित्येनेति ॥९४॥

यद्वृत्त्युपहितसाक्षिणि
यद्भाति तया तदीयसंस्कारः ।
इति नियमाद्विषयान्तर-
वृत्तिजसंस्कारतस्तदित्याहुः ॥ ९५ ॥

यद्वृत्त्यवच्छिन्ने साक्षिणि यत्प्रकाशते तद्वृत्त्या तद्गोचरसंस्कार आधीयत इति नियमात् अहंकारादीनां च स्वगोचरवृत्त्यभावे घटादिविषयान्तरगोचरवृत्त्यवच्छिन्नसाक्षिभास्यत्वेन तादृशवृत्तिजन्यसंस्कारवत्तया अनुसंधानमुपपद्यत इति मतेन समाधत्ते—यद्वृत्तीति । एतन्नियमानभ्युपगमे स्ववृ-

त्त्या स्वगोचरसंस्काराधानापत्तेर्वृत्तिगोचरवृत्त्यन्तराभ्युपगमेऽनवस्थाप्रसङ्गादिति भावः ॥ ९५ ॥

केचिदहंकारावच्छिन्नतया साक्ष्यनित्यतः ।
संस्कारस्तेनाहंकारस्मरणोपपत्तिरिति ॥ ९६ ॥

अन्याकारवृत्त्या अन्यगोचरसंस्काराधाने विषयव्यवस्थानुपपत्तेः स्वाकारवृत्त्यैव स्वगोचरसंस्काराधानमिति नियमः । तथा च अहंकारादिषु स्वाकारवृत्त्यभावेऽपि स्वभासकस्य साक्षिणः स्वावच्छिन्नत्वेनानित्यतया तेन संस्काराद्युपपत्तिरिति मतान्तरमाह— केचिदिति ॥ ९६ ॥

अहमाकारां वृत्तिमविद्यावृत्तिं समाश्रित्य ।
संस्कारसंभवेन स्मृत्युपपत्तिं प्रसाधयन्त्यन्ये ॥ ९७ ॥

सुखमहमस्वाप्समिति सुप्तोत्थितस्मृतेरुपपादनायावश्यकल्यामहमाकारां वृत्तिमविद्यावृत्तिमङ्गीकृत्याहंकारादिषु संस्काराद्युपपत्तिं प्रसाधयतां मतमाह— अहमाकारामिति ॥

अपरे त्वहमिति वृत्तिरु-
पासनवन्मानसी न तु ज्ञानम् ।
मानाजन्यतयातः
संस्कारादिर्भवेदिति प्राहुः ॥ ९८ ॥

अहमित्याकारा अन्तःकरणवृत्तिरेव । सा च उपासनावन्न ज्ञानम्, क्लृप्तप्रमाणाजन्यत्वात् । ततश्च संस्कारायुपपत्तिरिति मतान्तरमाह— अपरे त्विति ॥ ९८ ॥

अन्ये तु न क्रियाहं-
वृत्तिर्ज्ञानं प्रमाणजन्यत्वात् ।
नातश्चाहंकारा-
द्यनुसंधानेन दोष इत्याहुः ॥ ९९ ॥

उपास्तिर्हि वस्तुप्रमाणातन्त्रत्वात् पुरुषप्रयत्नाधीनत्वाच्चास्तु मानसी क्रिया । अहमाकारवृत्तिस्तु ज्ञानमेव मनोरूपप्रमाणजन्यत्वात् वस्तुतन्त्रत्वाच्च । अतः संस्कारसंभवेनाहंकाराद्यनुसंधाने न काचिदनुपपत्तिरिति मतान्तरमाह— अन्ये त्विति ॥ ९९ ॥

इत्थं च बाह्यविषया-
परोक्षवृत्त्यावृतिक्षतिः सिद्धा ।

नन्वेवमिदंवृत्त्या-
ज्ञाने नष्टे भ्रमो न स्यात् ॥ १०० ॥

इयता प्रबन्धेन प्रतिपादितं बाह्यापरोक्षवृत्त्यैवावरणाभिभव इति नियममुपसंहृत्यास्यापि नियमस्य शुक्तिरजतभ्रमस्थलेऽतिप्रसङ्गं शङ्कते— इत्थमिति । आवृतिक्षतिः आवरणाभिभव इत्यर्थः । उपादानाभावादिति भावः ॥ १०० ॥

अत्रेदंवृत्त्यापर-
मिदमंशाज्ञाननाशेऽपि ।
शुक्त्यंशाज्ञानवशा-
द्रजताध्यासोपपत्तिरित्याहुः ॥ १०१ ॥

इदमाकारवृत्त्येदमंशाज्ञानस्य नाशेऽपि न पश्यामीत्यनुभवेन शुक्त्यंशाज्ञानसत्त्वेन तद्वशाद्रजताध्यासोपपत्तिरिति परिहरति—अत्रेति ॥ १०१ ॥

अन्ये त्विदमाकारक-
वृत्त्यावरणांशनाशेऽपि ।
विक्षेपांशोपहिता-
दिदमंशाज्ञानतः सेति ॥ १०२ ॥

इदमंशसंभवेन प्रतीयमानस्य रजतस्येदमंशाज्ञानमेवोपादानम् । तस्येदमाकारवृत्त्यावरणांशनाशेऽपि विक्षेपांशानिवृत्त्या तत्सहितेदमंशाज्ञानाद्रजताध्यासोपपत्तिरिति मतान्तरमाह—अन्ये त्विति ॥ १०२ ॥

अपरे त्विदमाकारा
वृत्तिर्नास्त्येव रूप्यधीभिन्ना ।
तस्याः कथमावरणा-
भिभावकत्वप्रसङ्ग इत्याहुः ॥ १०३ ॥

इदं रूप्यमिति विशिष्टगोचरैव वृत्तिर्दोषादिसहकृतेन्द्रियसंप्रयोगादुत्पद्यते, न तद्व्यतिरेकेणेदमाकारा वृत्तिरस्ति । तस्या आवरणाभिभावकत्वप्रसङ्गो निरालम्बन इति कवितार्किकचक्रवर्तिमतमाह—अपरे त्विति ॥ १०३ ॥

इतरे त्वेकैवेदं-
वृत्तिर्भ्रमहेतुरन्यवैफल्यात् ।
अध्यस्तं त्विह रूप्यं
साक्षिप्रतिभास्यमित्याहुः ॥ १०४ ॥

अधिष्ठानज्ञानस्याध्यासकारणत्वाद्रूप्याध्यासकारणमिदमाकारा वृत्तिरेकैव । न त्वन्या रूप्याकारा, प्रयोजनाभावात् ।

रूप्यभानं तु इदंवृत्त्यभिव्यक्तसाक्षिचैतन्येनैवोपपद्यत इति मन्यमानानां मतमाह—इतरे त्विति ॥ १०४ ॥

ज्ञानद्वयमिति पक्षे
त्विदमिति वृत्तिर्भ्रमे हेतुः ।
अन्येदं रजतमिति
स्यादिदमध्यस्तगोचरेत्येके ॥ १०५ ॥

ज्ञानद्वयाङ्गीकारपक्षे रजताध्यासहेतुभूतेदंवृत्तिरेका, अन्या तु इदमध्यस्तरजतोभयगोचरा, इदं रजतं जानामीतीदमर्थतादात्म्येन रजतानुभवादिति मतान्तरमाह—ज्ञानद्वयमिति ॥

इदमिति मानसवृत्तिर-
विद्यावृत्तिस्तु तद्भिन्ना ।
रजताकारा तथा
नेदंविषयत्वमित्यपरे ॥ १०६ ॥

अध्यासात्पूर्वमिदमिति जायमाना वृत्तिर्मानसी, रजताकारा तु इदमाकारवृत्त्यवच्छिन्नचैतन्यस्थाविद्यापरिणामरूपतया-विद्यावृत्तिः । तस्याश्च नेदंविषयत्वम् । इदमर्थतादात्म्यानुभवस्तु अधिगतेदंत्वविषयत्वसंसर्गेण युज्यत इति मतान्तरमाह— इदमिति ॥ १०६ ॥

---

१७. अपरोक्षानुभूत्यर्थं वृत्ते-र्निर्गमवादः ॥

नन्वविनिर्गतवृत्त्या-
वच्छिन्नेनैव साक्षिबोधेन ।
सकलविषयावभासो-
पपत्तिरिति वृत्तिनिर्गमो व्यर्थः ॥ १०७ ॥

परोक्षस्थल इवापरोक्षवृत्तिस्थलेऽप्यविनिर्गतवृत्त्यवच्छिन्नसाक्षिचैतन्येनैव सकलविषयावभासोपपत्तेरनुमितिशाब्दयोरिव कारणवैलक्षण्योपपत्तेः वृत्तेर्विषयदेशकल्पनं वृथेति शङ्कते—नन्विति ॥ १०७ ॥

अत्र वदन्त्यपरोक्षे
विषयाधिष्ठानभूतचिद्व्यक्त्यै ।
तन्निर्गमाभ्युपगमो
युक्तो न तु परोक्ष इति केचित् ॥

तादात्म्यसंबन्धसंभवे स्वरूपसंबन्धस्य कल्पनायोगात् प्रत्यक्षस्थले तादात्म्येन विषयाधिष्ठानचैतन्यमेव विषयप्रकाश-इति तदभिव्यक्त्यर्थं युक्तो वृत्तिनिर्गमाभ्युपगमः । परोक्षस्थले तु न तथा । तत्र वृत्तिनिर्गमद्वाराभावेनागत्या स्वरू-

पसंबन्धेनाविनिर्गतवृत्त्यवच्छिन्नचैतन्यमेव विषयप्रकाश आश्रियत इति मतेन समाधत्ते—अत्रेति ॥ १०८ ॥

साक्षाच्चित्संसर्गा-
द्दुःखादिष्वापरोक्ष्यदर्शनतः ।
तत्सिद्धये घटादौ
वृत्तेर्निर्गमनमित्यन्ये ॥ १०९ ॥

अहंकारसुखदुःखादिषु साक्षाच्चैतन्यसंसर्गेणैवापरोक्षदर्शनादत्रापि तथैवेति तत्सिद्धये घटादौ वृत्तेर्निर्गमः समभ्युपगम्यत इति मतान्तरमाह—साक्षादिति ॥ १०९ ॥

प्रत्यक्षे गन्धादौ
स्पष्टत्वं वृत्तिनिर्गमाधीनम् ।
दृष्टमतोऽन्यत्रापि
स्पष्टत्वायैतदित्यपरे ॥ ११० ॥

परोक्षापेक्षया प्रत्यक्षे गन्धादावनुभूयमानं स्पष्टत्वं वृत्त्यभिव्यक्तचैतन्यतादात्म्यप्रयुक्तं दृष्टमित्यतोऽन्यत्रापि स्पष्टत्वार्थं वृत्तिनिर्गमनमपेक्षत इति मतान्तरमाह— प्रत्यक्ष इति ॥

नन्वेवं स्पष्टत्वं
विषयावरणाभिभूतिरस्याश्च ।

अविनिर्गतया वृत्त्या
सिद्धेः किं वृत्तिनिर्गमेनेति ॥ १११ ॥

नन्वेवमावरणाभिभूतिरेव स्पष्टतेति पर्यवसन्नम् । तस्या-श्चानिर्गतवृत्त्यैव सिद्धेः किं वृत्तिनिर्गमनेनेति शङ्कते—नन्विति । नन्वेवं वृत्तेर्भिन्नदेशस्थत्वात् कथं तया विषयगताज्ञाननिवृत्तिरिति चेन्न । यदज्ञानं यं पुरुषं प्रति यद्विषयावारकम्, तत् तदीयतद्विषयकज्ञाननिवर्त्यमिति ज्ञानाज्ञानयोर्विरोधप्रयोजकस्य नियमस्य सत्त्वादिति भावः ॥१११॥

अत्रैतदनिर्गमने-
न ज्ञानाज्ञानयोर्विरोधस्य ।
निर्वाहः स्यादिति त-
ल्लाभार्थं वृत्तिनिर्गमापेक्षा ॥ ११२ ॥

वृत्तिनिर्गमानभ्युपगमे ज्ञानाज्ञानयोर्विरोधप्रयोजकस्य दुर्निरूपत्वेन तयोर्विरोधनिर्वाहो न स्यात् । न च यदज्ञानं यं पुरुषं प्रति इत्यादि तत्प्रयोजकमुक्तमिति वाच्यम् । परोक्षज्ञानेनापि विषयगताज्ञाननिवृत्तिप्रसङ्गात् । तन्निर्गमाभ्युपगमे तु यदज्ञानं यं पुरुषं प्रति यद्विषयावारकम्, तत् तदीयतदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञाननिवर्त्यमिति तत्प्रयोजक-

स्य निरूपयितुं शक्यत्वेन तयोर्विरोधनिर्वाहो भवतीति तदर्थं वृत्तिनिर्गमापेक्षेति मतेन समाधत्ते—अत्रेति ॥ ११२ ॥

विषयगताज्ञानस्य
स्वसमानाधिकरणबोधनाद्यत्वे ।
सिद्धे वृत्तेरर्था-
न्निर्गमनं पर्यवस्यतीत्यन्ये ॥ ११३ ॥

विषयगताज्ञानस्य लाघवात् स्वसमानाधिकरणज्ञाननिवर्त्यत्वसिद्धावर्थाद्वृत्तिनिर्गमः फलतीति मतान्तरमाह—विषयेति ॥ ११३ ॥

सामानाधिकरण्ये
सत्येव तमः प्रकाशनाद्यमिति ।
दृष्टानुरोधतस्त-
न्निर्गमनं सिध्यतीत्येके ॥ ११४ ॥

बाह्यप्रकाशस्य बाह्यतमोनिवर्तकत्वं सामानाधिकरण्ये सत्येव दृष्टमिति दृष्टानुरोधाद्वृत्तिनिर्गमः सिध्यतीति मतान्तरमाह— सामानाधिकरण्य इति ॥ ११४ ॥

आवरणाभिभवार्थं
मा भूत्तन्निर्गमापेक्षा ।

स्याच्चिदुपरागसिध्यै
तदभेदव्यक्तयेऽथवेत्यन्ये ॥ ११५ ॥

चिदुपरागोऽभेदाभिव्यक्तिर्वा वृत्तिफलमिति मतयोस्तु तदर्थमेव वृत्तिनिर्गमनकल्पनमित्याह— आवरणेति ॥


इत्थं प्रत्यगभिन्ने
ब्रह्मणि वेदान्तवाक्यानाम् ।
तात्पर्येणान्वयतो
जीवपराभेदसंसिद्धिः ॥ ११६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीपरमशिवेन्द्र-
पूज्यपादशिष्य श्रीसदाशिवब्रह्मेन्द्रविरचित-
वेदान्तसिद्धान्तकल्पवल्ल्यां
प्रथमः स्तबकः समाप्तः ॥

प्रासङ्गिकं परिसमाप्य सर्ववेदान्तसिद्धं प्रत्यग्ब्रह्माभेदमुपसंहरति— इत्थमिति ॥ ११६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्परमशिवेन्द्रपूज्यपाद-
शिष्यश्रीसदाशिवब्रह्मेन्द्रप्रणीतश्रीवेदान्तसिद्धान्त-
कल्पवल्लीव्याख्यायां केसरवल्ल्याख्यायां
प्रथमः स्तबकः ॥

द्वितीयस्तबकः ॥



१. श्रुतिप्रत्यक्षयोः प्राबल्यदौर्बल्यवादः ।

नन्वद्वैते ब्रह्मणि
वेदान्तसमन्वयः कथं सिध्येत् ।
विश्वगतसत्त्वविषय-
प्रत्यक्षविरोधदर्शनादिति चेत् ॥ १ ॥

प्रथमस्तबके सर्ववेदान्तानामद्वितीयब्रह्मणि समन्वयं व्युत्पाद्य तस्य दृढीकरणाय प्रमाणान्तराविरोधं व्यवस्थापयिष्यन् प्रथमं घटः सन्नित्यादिघटादिप्रपञ्चगतसत्त्वग्राहिप्रत्यक्षविरोधात्कथमद्वितीये ब्रह्मणि वेदान्तानां समन्वयः सिध्येदिति प्रत्यक्षविरोधं शङ्कते—नन्विति ॥ १ ॥

इह तत्त्वशुद्धिकाराः
प्रत्यक्षं नो घटादि गृह्णाति ।
किं तु घटाद्यनुविद्धं
सन्मात्रमतो न विरोध इति ॥ २ ॥

यदि प्रत्यक्षं घटादिप्रपञ्चं तत्सत्त्वं वा गृह्णीयात्, तदा परं विरोधः । न तथा गृह्णाति । किं तु अधिष्ठानत्वेन घटाद्यनुगतं सन्मात्रमेव । तथा च प्रत्यक्षमपि सद्रूपब्रह्माद्वैतसिध्यनुकूलमेवेति मतेन परिहरति—इहेति । यथा भ्रमेष्विन्द्रियान्वयव्यतिरेकयोरधिष्ठानेदमंशग्रहण एवोपक्षयः अध्यस्तरजतादेस्तु भ्रान्त्यैव प्रतिभासः, तथा सर्वत्रेन्द्रियैः सन्मात्रग्रहणम् । मायिकघटतद्भेदादेस्तु भ्रान्त्यैव प्रतिभास इति भावः ॥ २ ॥

अस्तु घटादेरिन्द्रिय-
वेद्यत्वमथापि न विरोधः ।
न्यायसुधोदितरीत्या
सद्बुद्धेर्ब्रह्मसत्त्वविषयत्वात् ॥ ३ ॥

अस्तु घटादिप्रपञ्चस्य प्रत्यक्षवेद्यत्वम्, तथापि न विरोधः, घटः सन्नित्यादिसद्बुद्धेराधिष्ठानब्रह्मसत्त्वविषयत्वात् । सत्त्वान्तरविषयत्वकल्पने गौरवादिति मतान्तरमाह— अस्तिवति ॥ ३ ॥

संक्षेपकोक्तरीत्या-
क्षस्यापि घटादिसत्त्वविषयत्वम् ।

भवतु तथापि न तत्त्वा-
वेदकता मानतेति न विरोधः ॥ ४ ॥

प्रत्यक्षस्य घटादिगताध्यस्तसत्त्वग्राहित्वेऽपि परागिविषय-त्वेन तस्य न तत्त्वावेदकत्वं प्रामाण्यम्। श्रुतेस्तु तत्प्रामाण्य-मस्तीति न तद्विरोध इति मतान्तरमाह— **संक्षेपकेति** ॥

प्रत्यक्षसमधिगम्यं
सत्त्वं जात्यादि न त्वबाध्यत्वम् ।
न विरुध्यते तदेत-
न्मिथ्यात्वेनेति चक्षते केचित् ॥ ५ ॥

वर्तमानमात्रगोचरप्रत्यक्षेण कालत्रयाबाध्यत्वरूपसत्त्वग्रह-णायोगात्, तद्वेद्यं जात्यादिरूपमेव सत्त्वम् । तच्च मिथ्या-त्वेन न विरुध्यत इति मतान्तरमाह— **प्रत्यक्षेति** ॥ ५ ॥

यावद्ब्रह्मविनिश्चय-
मबाध्यतारूपसत्त्वस्य ।
प्रत्यक्षग्राह्यत्वे-
ऽप्यविरोधः श्रुतिभिरित्यन्ये ॥ ६ ॥

द्विविधं सत्त्वम् । यावद्ब्रह्मज्ञानमबाध्यत्वरूपं सर्वदैवा-बाध्यत्वरूपं चेति । तत्राद्यस्य प्रत्यक्षग्राह्यत्वेऽपि मिथ्यात्व-

प्रतिपादकश्रुतिभिर्न विरोध इति मतान्तरमाह—यावदिति ॥ ६ ॥

अस्तु विरोधस्तदपि
श्रुत्या निर्दोषया कनीयस्या ।
ज्यायोऽपि प्रत्यक्षं
शङ्कितदोषं च बाध्यमित्यपरे ॥ ७ ॥

प्रपञ्चस्य मिथ्यात्वसत्यत्वग्राहिणोः श्रुतिप्रत्यक्षयोर्विरोधेऽपि दोषशङ्काकलङ्कितं प्रथमप्रवृत्तमपि प्रत्यक्षं निर्दोषत्वादपच्छेदन्यायेन परत्वाद्बलीयस्या श्रुत्या बाध्यत इति मतान्तरमाह—अस्त्विति ॥ ७ ॥

श्रुतिरपि तात्पर्यवती
बलीयसीत्याह भामतीकारः ।
विवरणवार्तिककारा-
स्त्वाहुः श्रुतिमात्रमिह बलीय इति ॥

नन्वेवं यजमानः प्रस्तर इति यजमानस्य प्रस्तराभेदबोधकश्रुत्या तद्भेदप्रत्यक्षमपि बाध्यतामित्याशङ्क्याह— श्रुतिरपीति । तात्पर्यवत्येव श्रुतिर्मानान्तराद्बलीयसी । प्रस्तरस्तुत्यर्थवादस्य तु स्तुतौ तात्पर्यम्, न तु स्वार्थे । अतस्तत्र

मानान्तरविरोधे गौण्यादिकल्पनं युक्तमिति भावः। न तात्पर्येण श्रुतेः प्राबल्यम्। कृष्णलं श्रपयेदित्यत्रोष्णीकरण-लक्षणानापत्तेः, किं तु श्रुतित्वादेव प्राबल्यमित्युत्सर्गः। स-च मानान्तरस्य विषयान्तरसंभवस्थले चरितार्थः। तदसं-भवेऽपोद्यत इति मतान्तरमाह—विवरणेति ॥ ८ ॥

---

२. श्रुतिप्रत्यक्षयोरुपजीव्योपजीवकभाव-विरोधपरिहारवादः।

ननु वर्णाद्यवगाहि-
प्रत्यक्षस्यागमोपजीव्यत्वात्।
उपजीव्यविरोधे सति
हन्त प्राबल्यमागमस्य कथम् ॥ ९ ॥

वर्णपदादिगोचरत्वेन तत्प्रत्यक्षस्य श्रुताद्वितीयब्रह्मज्ञान-हेतुत्वेनोपजीव्यत्वात्तद्विरोधे सति कथमागमस्य प्राबल्य-मिति शङ्कते—नन्विति। अपच्छेदाधिकरणे हि उपजीव्यत्वा-भावात्परेण पूर्वस्य बाधो युक्तः, इह तु न तथेति भावः ॥

शाब्दप्रमितौ वर्णा-
द्यध्यक्षं तु भ्रमप्रमानुगतम्।

हेतुर्न तत्त्वरूपं
तस्मान्न विरोध इत्याहुः ॥ १० ॥

वृषमानयेत्यादिवाक्यं श्रवणदोषाद्वृषभमानयेत्यादिरूपेण शृण्वतोऽपि शाब्दप्रमितिदर्शनेन शाब्दप्रमितौ वर्णपदादेः प्रत्यक्षं भ्रमप्रमासाधारणमेव हेतुः । न तु वर्णपदादिस्वरूपम् । तस्मादद्वैतागमेन वर्णपदादिस्वरूपोपमर्देऽपि नोपजीव्यविरोध इति मतेन समाधत्ते—शाब्देति ॥ १० ॥

अन्ये तु योग्यतासि-
ध्यपेक्षणेऽप्यत्र न विरोधः ।
आमुक्त्यसद्विलक्षण-
सत्त्वोपगमादिति प्राहुः ॥ ११ ॥

यद्यप्ययोग्यवाक्याच्छाब्दप्रमानुदयेन योग्यतास्वरूपसिध्यपेक्षास्ति, तदपेक्षायामपि मुक्तिपर्यन्तं व्यावहारिकासद्विलक्षणत्वार्थक्रियासमर्थत्वाभ्युपगमान्नोपजीव्यविरोध इति मतान्तरमाह—अन्ये त्विति ॥ ११ ॥

तात्त्विकसत्त्वेन जग-
न्निषिध्यते नेह नानेति ।

तेन पदाद्युपमर्दन-
शङ्काविरहान्न दोष इत्येके ॥ १२ ॥

नेह नानास्तीति श्रुत्या पारमार्थिकसत्त्वेनैव प्रपञ्चो निषिध्यते, न तु व्यावहारिकसत्त्वेन । न चाप्रसक्तप्रतिषेधः । शुक्तौ रजताभासप्रतीतिरेव सत्यरजतप्रसक्तिरिति तन्निषेधवत् प्रपञ्चे सत्यत्वाभासप्रतीतिरेव पारमार्थिकसत्यत्वप्रतीतिरिति तन्निषेधोपपत्तेः । अतो व्यावहारिकसत्त्वानिषेधेन वर्णपदयोग्यतादिस्वरूपोपमर्दनशङ्कानवकाशान्नोपजीव्यविरोध इति मतान्तरमाह—तात्त्विकेति ॥ १२ ॥

केचित्तात्त्विकमेव हि
सत्त्वं तस्यानुवेधतो जगति ।
सत्त्वाभिमते तस्मि-
न्सत्त्वनिषेधेऽप्यदोष इति ॥ १३ ॥

ब्रह्मणि पारमार्थिकं सत्यत्वम्, प्रपञ्चे व्यावहारिकम्, शुक्तिरजतादौ च प्रातिभासिकमिति सत्तात्रैविध्यं नोपेयते । अधिष्ठानब्रह्मसत्तानुवेधादेव प्रपञ्चे शुक्तिरजतादौ च सत्त्वाभिमानोपपत्त्या सत्त्वाभासिकल्पनस्य निष्प्रमाणत्वात् । एवं

च प्रपञ्चे सत्त्वनिषेधेऽपि नोपजीव्यविरोध इति मतान्तरमाह—केचिदिति ॥ १३ ॥

इत्थं तात्त्विकसत्ता-
भिन्नतदाभासकल्पनाभावे ।
सत्यरजतातिरिक्तो
रजताभासः प्रकल्प्यते किमिति ॥ १४ ॥

नन्वेवं ब्रह्मगतपारमार्थिकसत्त्वातिरेकेण प्रपञ्चे सत्त्वाभासानभ्युपगमे व्यवहितसत्यरजतातिरेकेण रजताभासोत्पत्तिः किमित्युपेयत इति शङ्कते—इत्थमिति ॥ १४ ॥

इति चेदसंनिकर्षा-
दपरोक्षानर्हमेव रूप्यमिति ।
अपरोक्षानुभवबला-
द्रूप्याभासस्य कल्पना युक्ता ॥ १५ ॥

व्यवहितस्यासंनिकृष्टस्यापरोक्ष्यासंभवाच्छुक्तिरजतादौ च तदनुभवात्तन्निर्वाहाय तदुपगम इति परिहरति—इति चेदिति । अनेनासंनिकृष्टभ्रमस्थलेऽनिर्वचनीयविषयोत्पत्तिरिति नियमो दर्शितो भवति ॥ १५ ॥

---

३. प्रतिबिम्बस्य बिम्बाभेदभेदाभ्यां सत्यत्वमिथ्यात्ववादः ॥

नन्वित्थं प्रतिबिम्ब-
भ्रमस्थले संनिकर्षवैकल्यात् ।
मुकुरे मुखान्तरं स्या-
द्ग्रीवास्थितनिजमुखातिरेकेण ॥ १६ ॥

अस्मिन्नियमेऽतिप्रसङ्गमाशङ्कते—नन्विति । संनिकर्षवैकल्यादिति, ललाटादिप्रदेशावच्छेदेन मुखस्य संनिकर्षाभावादित्यर्थः । बिम्बातिरिक्तप्रतिबिम्बाभ्युपगमे ब्रह्मप्रतिबिम्बस्यापि जीवस्य ततो भेदेन मिथ्यात्वापत्त्या मुक्तिभाक्त्वानुपपत्तिरिति भावः ॥ १६ ॥

इह न मुखस्याध्यासो
मुकुराहतदृष्टिसंनिकृष्टत्वात् ।
किं त्वस्य मुकुरगत्वं
भ्रम इति निगदन्ति विवरणानुगताः ॥

भवेदेवं यदि दर्पणे मुखस्याध्यासः स्यात्; न त्वेतदस्ति; तस्य दर्पणप्रतिहतपरावृत्तदृष्टिसंनिकृष्टत्वात् । किंतु ममेदं

मुखं दर्पणे भाति नात्र मुखमस्तीति दर्पणस्थत्वबाधयोरनुभवादस्य दर्पणस्थत्वमेवाध्यस्यत इति मतान्तरमाह—इहेति ॥

बिम्बमुखात्पार्श्वस्थै-
र्भेदेन निरीक्ष्यमाणमादर्शे ।
प्रतिबिम्बितं मुखं त-
न्मिथ्येत्यद्वैतविद्याकृत् ॥ १८ ॥

बिम्बमुखाद्भेदेन तत्सदृशत्वेन च पार्श्वस्थैः स्पष्टं निरीक्ष्यमाणं दर्पणे प्रतिबिम्बितं ततो भिन्नं स्वरूपतो मिथ्यैव । स्वकरगतादिव रजताच्छुक्तिरजतम् । दर्पणे मे मुखमिति व्यपदेशस्तु स्वच्छायामुखे स्वमुखव्यपदेशवद्गौण इति जीवत्रैविध्यवाद्यभिप्रायमाविष्कुर्वतां मतमाह— बिम्बेति । अस्मिन्पक्षे प्रतिबिम्बजीवस्य मिथ्यात्वेऽपि अवच्छिन्नजीवस्य सत्यत्वात् न पूर्वोक्तमुक्तिभाक्त्वानुपपत्तिरिति भावः ॥

ननु कथमयमध्यास-
स्तद्धेत्वज्ञानसंक्षयादिति चेत् ।
विक्षेपशक्तिमात्रव-
दज्ञानं तत्र हेतुरित्याहुः ॥ १९ ॥

दर्पणप्रत्यक्षेणोपादानाज्ञाननाशात् कथं प्रतिबिम्बाध्यास

इत्याशङ्क्य तत्प्रत्यक्षेण तदज्ञानस्यावरणांशनाशेऽपि बिम्ब-संनिधानादिप्रतिबन्धाद्विक्षेपांशेन नाशाभावात्तादृशमेवाज्ञानं प्रतिबिम्बोपादानमिति परिहरति—**नन्विति** ॥ १९ ॥

मूलाज्ञानं हेतु-
र्बिम्बासंनिहितमुकुरधीर्बाधः ।
बिम्बादिदोषजत्वा-
त्प्रातीतिकता च घटत इत्येके ॥ २० ॥

न तावद्विक्षेपशक्तिमदवस्थाज्ञानं प्रतिबिम्बोपादानम् । यत्र पूर्वमेव दर्पणप्रत्यक्षं पश्चात् बिम्बसंनिधौ तत्र प्रतिब-न्धकाभावाद्विक्षेपांशस्य नाशे प्रतिबिम्बानुदयप्रसङ्गात् । किंतु विक्षेपशक्तिमन्मूलाज्ञानमेव तदुपादानम् । न च तत्रापि तुल्यो दोषः, पराग्विषयवृत्तीनां स्वस्वविषयावच्छिन्नचैतन्य-प्रदेशे मूलाज्ञानावरणशक्त्यंशाभिभावकत्वेऽपि तदीयविक्षे-पानिवर्तकत्वस्य व्यावहारिकघटादिविक्षेपानिवृत्त्या क्लृप्त-त्वादिति मतान्तरमाह—**मूलेति** । ननु तर्हि बिम्बापसरणेऽपि यावद्ब्रह्मज्ञानोदयं प्रतिबिम्बानुवृत्तिः स्यात्, उपादानाज्ञान-सत्त्वादित्याशङ्क्याह— **बिम्बासंनिहितमुकुरधीर्बाध इति** । बिम्बासंनिधिसहकृतमुकुरप्रत्यक्षं मूलाज्ञानानिवर्तकमपि स्व-

विरुद्धतत्कार्यविक्षेपनिवर्तकमेवेत्यर्थः । तथा च ब्रह्मज्ञानस्य निवर्तकत्वपक्षेऽपि तादृङ्मुकुरप्रत्यक्षं मुद्गरप्रहारो घटस्येव प्रतिबिम्बस्य तिरोधायकमेवेत्युभयथा न प्रतिबिम्बानुवृत्तिरिति भावः । ननु तर्हि तस्य व्यावहारिकत्वापत्तिरित्याङ्क्याह—बिम्बादीति । बिम्बसंनिधानस्वच्छत्वादिदोषजन्यत्वात् प्रातिभासिकमित्यर्थः । तथा च अविद्यातिरिक्तदोषाजन्यत्वमेव व्यावहारिकत्वप्रयोजकमिति भावः ॥

---

४. स्वप्नाधिष्ठानवादः ।

केचित्स्वप्नोऽप्येवं
मूलाज्ञानैकहेतुको भवति ।
निद्राजन्यतया प्रति-
भामात्रो ब्रह्मबोधबाध्य इति ॥ २१ ॥

एवं स्वप्नोऽप्यवस्थाशून्येऽहंकारोपहिते शुद्धे वा चैतन्ये अध्यासान्मूलाज्ञानोपादानक एव, आगन्तुकनिद्रादिदोषजन्यत्वात् प्रातिभासिकः, ब्रह्मज्ञानबाध्यश्चेति मतान्तरमाह—केचिदिति । ब्रह्मज्ञानैकबाध्यत्वेऽपि स्वप्नस्य प्रबोधे सति तिरोधानान्न जाग्रद्दशायामनुवृत्तिरिति भावः ॥ २१ ॥

स्वप्नाध्यासस्य परे
प्राहुर्जाग्रत्प्रबोधतो बाधम् ।
ब्रह्मज्ञानेतरधी-
बाध्यतया प्रातिभासिकत्वं च ॥ २२ ॥

'बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे' इति भाष्योक्तेर्जागरिते स्वप्नमिथ्यात्वानुभवाच्च स्वप्नाध्यासस्य जाग्रत्प्रबोधादेव बाधः । ब्रह्मज्ञानेतरज्ञानबाध्यतया प्रातिभासिकत्वं चेति मतान्तरमाह— **स्वप्नेति** । उपादानाज्ञाने सत्यपि भ्रमरूपेणापि जाग्रत्प्रबोधेन स्वप्नभ्रमस्य रज्जौ दण्डभ्रमेण सर्पभ्रमस्येव बाधो युक्त इति भावः ॥ २२ ॥

केचिद्विद्यावस्था-
लक्षणनिद्रानिदानकः स्वप्नः ।
सांव्यवहारिकजीव-
ज्ञानाद्विनिवर्त्य इत्याहुः ॥ २३ ॥

जाग्रद्भोगप्रदकर्मोपरमे व्यावहारिकजगज्जीवावावृण्वन्ती मूलाज्ञानावस्थाभेदरूपा निद्रैव स्वाप्नप्रपञ्चस्योपादानम्, न मूलाज्ञानम् । पुनश्च जाग्रद्भोगप्रदकर्मोद्बोधे व्यावहारिकजीव-

स्वरूपज्ञानात् स्वोपादाननिद्रारूपाज्ञाननिवृत्त्या तस्य निवृत्तिरिति मतान्तरमाह— केचिदिति ॥ २३ ॥

निद्रादोषयुतायाम्-
न्तर्वृत्तावभिव्यक्ते ।
शुद्धे चैतन्ये स्या-
त्स्वप्नाध्यास इति मन्वते केचित् ॥

अहंकारोपहिते शुद्धे वा प्रागुक्तस्वप्नाध्यासो न युक्तः । आद्ये अहं गजः गजवान्वेति भानापत्तेः । द्वितीये, प्रमातृसंबन्धाय चक्षुरादिवृत्त्यपेक्षोपपत्तेरित्याशङ्क्य अन्तःकरणस्य बहिरस्वातन्त्र्येऽपि देहान्तःस्वातन्त्र्यात् तदन्तःकरणवृत्तौ निद्रादोषोपेतायामभिव्यक्ते शुद्धचैतन्ये तदाश्रिताविद्यापरिणामरूपः स्वप्नाध्यास इति विवरणोपन्यासकृन्मतेन द्वितीयपक्षे दोषमुद्धरति— निद्रेति । साक्षात्प्रमातृसंबन्धेन तद्भानोपपत्तेस्तदर्थं न चक्षुरादिवृत्त्यपेक्षेति भावः ॥ २४ ॥

केचित्तस्मिन्नेवा-
विद्याप्रतिबिम्बचैतन्ये ।
स्वयमपरोक्षतयास्य तु
तद्भासार्थं न वृत्त्यपेक्षेति ॥ २५ ॥

अविद्याप्रतिबिम्बे पूर्वोक्तशुद्धचैतन्य एव स्वप्नाध्यासः। अस्य शुद्धचैतन्यस्य स्वत एवापरोक्ष्यादध्यासावभासकत्वोपपत्तेस्तदर्थं न चक्षुरादिवृत्त्यपेक्षेति द्वितीयपक्ष एव मतान्तरेण दोषमुद्धरति— केचिदिति। प्रमात्वस्वप्नदृष्टत्वानुभवस्तु तदधिष्ठानशुद्धचैतन्यगोचरतत्समनियतान्तःकरणवृत्तिकृताभेदाभिव्यक्तेरिति भावः॥ २५॥

केचिदहंकृत्युपहित-
तत्प्रतिबिम्बे तदध्यासः।
नाहंकारविशिष्टे
येन स्यादहमिति प्रतीतिरिति॥ २६॥

नाहंकारविशिष्टे स्वप्नाध्यासः। येन गजोऽहमित्यादिप्रत्ययः प्रसज्येत। किंतु अहंकारोपहिते तत्प्रतिबिम्बचैतन्य इत्याद्यपक्षेऽपि दोषमुद्धरति— केचिदिति। विशेषणवदुपाधेः कार्यान्वयाभावादिति भावः॥ २६॥

शुक्तीदंचैतन्य-
प्रतिबिम्बे वृत्तिमन्मनोनिष्ठे।
अध्यासो रजतादे-
रत एवानन्यवेद्यतेत्याहुः॥ २७॥

एवं स्वप्नाध्यासस्य मतभेदेनाधिष्ठानमुक्त्वा रजताध्यासस्यापि तदाह— शुक्तीति । शुक्तीदंचैतन्यं शुक्तीदमंशावच्छिन्नचैतन्यम्, तस्य प्रतिबिम्ब इत्यर्थः । अत एव, प्रतिबिम्बाध्यासादेवेत्यर्थः । बिम्बेऽध्यासे तु शुक्त्यादिवदन्यवेद्यता स्यादित्यर्थः ॥ २७ ॥

इदमंशावच्छिन्ने
बिम्बेऽप्यध्यासमभ्युपेत्य परे ।
तत्तदविद्याश्रयपुं-
ग्राह्यत्वान्नान्यवेद्यतेत्याहुः ॥ २८ ॥

मतान्तरमाह— इदमंशेति । नन्वेवं तर्हि पुरुषान्तरवेद्यता स्यादित्याशङ्क्याह— तत्तदिति ॥ २८ ॥

---

५. स्वप्नपदार्थानुभववादः ।

नन्वस्तु शुक्तिरूप्ये
चाक्षुषताप्रत्ययः कथंचिदपि ।
स्वाप्नगजादिष्वेषो-
ऽनुभवः कथमाविरस्त्विति चेत् ॥ २९ ॥

ननु शुक्तिरजते चाक्षुषत्वानुभवः साक्षाद्वा अधिष्ठानद्वारा वा कथंचित्समर्थ्यताम् । स्वाप्नगजादिषु तथानुभवः कथ समर्थनीय इति शङ्कते—नन्विति ॥ २९ ॥

अत्राहुस्तद्वसरे
चक्षुःप्रमुखेन्द्रियोपरमात् ।
स्वाप्नेषु चाक्षुषत्वा-
नुभवो भ्रम एव भवतीति ॥ ३० ॥

स्वप्नावस्थायां चक्षुरादीन्द्रियोपरमात् स्वयंज्योतिष्ट्ववादेन स्वाप्नेन्द्रियकल्पनाया असंप्रतिपत्तेश्च दोषसंस्कारानुरोधेन चाक्षुषत्वानुभवो भ्रम इति मतेन परिहरति— अत्रेति ॥

दृष्टिसमकालसृष्टौ
दृष्टेः प्रागर्थमात्रविरहेण ।
स्याज्जाग्रदर्थबोधे-
ऽप्यैन्द्रियकत्वोपलम्भनं भ्रान्तिः ॥ ३१ ॥

दृष्टिसृष्टिवादे दृष्टिसमकाला सृष्टिरिति पक्षे दृष्टेः पूर्वं घटे घटार्थमात्राभावेन तत्संनिकर्षाभावात् स्वप्नवज्जाग्रद्वच्च जाग्रद्घटाद्यनुभवे चाक्षुषत्वानुभवो भ्रम इति केषांचिन्मत-माह— दृष्टीति ॥ ३१ ॥

६. दृष्टिसृष्टिकल्पकवादः ।

इह दृष्टिसृष्टिवादे
साविद्यस्य प्रपञ्चजातस्य ।
पूर्वाविद्यासचिवः
कल्पक आत्मेति मेनिरे केचित् ॥ ३२ ॥

नन्वस्मिन् दृष्टिसृष्टिवादे कृत्स्नस्य जगतः कल्पको निरुपाधिकः सोपाधिको वा आत्मा ? प्रथमे, मुक्तस्यापि तत्कल्पकत्वापत्तिः । द्वितीये, उपाध्यसिद्धिरित्याशङ्क्य पूर्वपूर्वाविद्योपहित एवोत्तरोत्तरसाविद्यसर्वप्रपञ्चस्य कल्पक इति केषांचिन्मतमाह— इहेति । अविद्याया अनादित्ववादस्तु स्वाप्नाकाशादेरिवानादित्वेनैव कल्पनादिति भावः ॥ ३२ ॥

केचिदनादित्वेना-
विद्यादेर्नैष कल्पकस्तस्य ।
किंत्वेतद्व्यतिरिक्त-
प्रपञ्चमात्रस्य तावदिति ॥ ३३ ॥

अस्मिन्नेव वादे वस्तुतोऽविद्यादेरनादित्वेन तदन्यत्रात्मा कल्पक इति मतान्तरमाह— केचिदिति । एषः, पूर्वोक्त आत्मेत्यर्थः ॥ ३३ ॥

केचित्तु दृष्टिरेव
प्रपञ्चसृष्टिस्ततो नान्या ।
दृश्यस्य दृष्टिभेदे
मानाभावादिति प्राहुः ॥ ३४ ॥

दृष्टिसृष्टिवादे सिद्धान्तमुक्तावल्युक्तं विरोधान्तरमाह—केचिदिति । प्रस्तुतप्रपञ्चस्य दृष्टयभेदे 'ज्ञानस्वरूपमेवाहुर्जगदेतद्विलक्षणम्' इत्यादि विष्णुपुराणवचनं प्रमाणमस्तीति भावः ॥ ३४ ॥

सृष्टस्य दृष्टिवादे
जगतोऽस्मद्भ्रान्त्यकल्पितत्वेऽपि ।
सदसद्विलक्षणतया
मिथ्यात्वमिहोपपन्नमित्यन्ये ॥ ३५ ॥

ईश्वरसृष्टस्य जगतो दृष्टिरिति पक्षे अध्यासकारणदोषसंस्काराभावेनास्मदादिभ्रान्त्यकल्पितत्वेऽपि सदसद्विलक्षणत्वेन श्रुतिप्रमाणकमिथ्यात्वं संभवतीति पूर्वोक्तमतद्वये मनःप्रत्ययमलभमानानां केषांचिन्मतमाह—**सृष्टस्येति** ॥ ३५ ॥

---

७. मिथ्याभूतस्यापि व्यावहारिक-सत्यार्थक्रियाकारित्ववादः ।

मिथ्यात्वं यदि जगत-
स्तत्कथमर्थक्रियासमर्थत्वम् ।
अत्र स्वप्नवदर्थ-
क्रियां वदन्ति स्वतुल्यसत्ताकाम् ॥ ३६ ॥

दृष्टिसृष्टिवादे सृष्टिदृष्टिवादे च मिथ्यात्वसंप्रतिपत्तेः कथं मिथ्याभूतस्यार्थक्रियाकारित्वमित्याशङ्क्य स्वप्नसमानसत्ताकार्थक्रियाकारित्वं संभवतीति केषांचिन्मतेन परिहरति— मिथ्यात्वमिति ॥ ३६ ॥

अन्ये तु स्वप्नोदित-
साध्वसकम्पस्य जाग्रदनुवृत्त्या ।
नैवार्थतत्क्रियाणां
समसत्ताकत्वनियम इत्याहुः ॥ ३७ ॥

स्वप्नभुजङ्गव्याघ्रादिजनितभयकम्पादेर्जाग्रद्दशायामप्यनुवृत्तिदर्शनादर्थानां तत्क्रियाणां च समानसत्ताकत्वनियमो नास्तीति मतान्तरमाह— अन्ये त्विति ॥ ३७ ॥

सालोकेऽप्यपवरके
प्रविशत्पुरुषेण कल्पितं ध्वान्तम् ।
अर्थक्रियासमर्थं
दृष्टमितीत्थं निदर्शयन्त्यपरे ॥ ३८ ॥

अत्रान्तर्गृहे तत्रत्यपुरुषान्तरीयघटादिदर्शनसमर्थप्रकाशव्यक्तस्मात् प्रविशता पुरुषेणाध्यस्तं तमः तं प्रति घटाद्यावरणाद्यर्थक्रियासमर्थं दृष्टमिति निदर्शनपूर्वकं पूर्वोक्तमेव मतमनुसरतां मतमाह— **सालोक** इति ॥ ३८ ॥

अन्ये तु नार्थसत्ता-
मपेक्षते तत्क्रिया किं तु ।
सत्यं वासत्यं वा
तत्तत्स्वरूपमात्रमिति प्राहुः ॥ ३९ ॥

अर्थक्रियाप्रयोजकत्वं न सत्यत्वम् । अर्थक्रियानुत्पत्तिदशायां घटादेरसत्यत्वप्राप्तेः । किं तु सत्यं वासत्यं वा तत्तद्व्यक्तिमात्रमिति मिथ्यात्वेऽप्यर्थक्रियाकारित्वसंभवादिति मतान्तरमाह—अन्ये त्विति ॥ ३९ ॥

मरुपर्यसि जात्यभावा-
त्पानाद्यर्थक्रिया तु नेत्येके ।

अस्त्येव जातिरर्थ-
क्रियापि काचिन्न चाखिलेत्यन्ये ॥ ४० ॥

नन्वेवं सति मरुमरीचिकोदकेनापि पानाद्यर्थक्रियाप्रसङ्ग इत्याशङ्क्य तत्र तोयत्वजात्यभावान्नैवमिति तत्त्वशुद्धिकारादिमतेनोत्तरमाह— **मरुपयसीति** । अत्र तोयत्वभानं तु संस्कारबलेनेति भावः । अन्यथाख्यात्यनभ्युपगमात्तोयत्वजातीयत्वानुसंधानं विना तोयार्थिनस्तत्प्रवृत्त्ययोगाच्च तोयत्वजातिरस्त्येव । तल्लिप्सया धावनादिजननादर्थक्रिया च काचिदस्त्येव । तथापि क्वचिद्दोषसामान्यज्ञानाध्यासहेतूच्छेदोपरमात् क्वचिद्विशेषदर्शनादधिष्ठानज्ञानेन बाधान्न सर्वार्थक्रियेति मतान्तरमाह— **अस्त्येवेति** ॥ ४० ॥

---

८. मिथ्यात्वस्य मिथ्यात्वेऽपि न प्रपञ्च-मिथ्यात्वहानिरिति वादः ।

मिथ्यात्वं यदि मिथ्या
जगतः सत्यत्वमापतेत्तर्हि ।
सत्यं चेदद्वैत-
क्षतिरत्राद्वैतदीपिकाकाराः ॥ ४१ ॥

तदेवं मिथ्यात्वेऽपि अर्थक्रियासिद्ध्यविरोधाज्जगतो मिथ्यात्वं सिद्धम्। तत्र माध्वः शङ्कते—मिथ्यात्वमिति। अत्रेत्यादेरुत्तरेणान्वयः ॥ ४१ ॥

स्वाश्रयसमसत्ताको
धर्मः स्वविरुद्धधर्महरः।
इति नियमान्मिथ्यात्वं
सत्यत्वनिवृत्तिहेतुरित्याहुः ॥ ४२ ॥

सर्वत्र धर्माणां स्वविरोधिप्रतिक्षेपकत्वे धर्मिसमसत्ताकत्वमेव तन्त्रम्। न पारमार्थिकत्वमपि। व्यावहारिकेणापि घटत्वेनाघटत्वादिप्रतिक्षेपदर्शनात्। अतो जगत्समसत्ताकेनापि मिथ्यात्वेन सत्यत्वप्रतिक्षेपसिद्धिरित्याशयेन परिहरति—**स्वाश्रयेति**। स्वविरुद्धधर्महरः स्वविरुद्धधर्मप्रतिक्षेपक इत्यर्थः। सत्यत्वनिवृत्तिहेतुः सत्यत्वप्रतिक्षेपहेतुरित्यर्थः ॥ ४२ ॥

---

९. औपाधिकजीवभेदेन सुखदुःखाद्यसांकर्यव्यवस्थावादः।

ननु भिन्नैर्जीवैः स-
द्वितीयता ब्रह्मणः कुतो न स्यात्।

नैषां भेदाभावा-
दुपाधिभेदात्सुखादिवैचित्र्यम् ॥ ४३ ॥

नन्वेवमचेतनस्य जगतोऽपि मिथ्यात्वे चेतनानामपवर्गभाजां मिथ्यात्वायोगात्कथं तैः सुखदुःखादिवैचित्र्यात्परस्परं भिन्नैर्ब्रह्मणः सद्वितीयता न स्यादिति शङ्कते—**नन्वि**ति । एवं च अद्वितीयब्रह्मणि वेदान्तसमन्वयो न युक्त इति भावः । नैवं सद्वितीयता ब्रह्मणः, जीवानां परस्परं भेदाभावात् । ननु तर्हि सुखादिवैचित्र्यं न स्यादिति चेन्न । अन्तःकरणोपाधिभेदेन तद्वैचित्र्योपपत्तेरिति केषांचिन्मतेन परिहरति—**नैषामिति** ॥ ४३ ॥

सत्यप्युपाधिभेदे
तद्भेदस्यानपायितया ।
उपपद्यतां कथं वा
सुखदुःखादिव्यवस्थितिस्तत्र ॥ ४४ ॥

ननूपाधिभेदे सत्यपि तदुपहितानां सुखदुःखाद्याश्रयाणा जीवानामभेदानपायात् कथं सुखदुःखादिव्यवस्थोपपद्यतामिति शङ्कते— **सतीति** । तत्रेत्युत्तरेणान्वयः ॥ ४४ ॥

अन्तःकरणस्यैव
श्रुत्या तद्धर्मकत्वोक्तेः ।
तद्भेदादेवोक्ता
व्यवस्थितिः स्यादिति प्राहुः ॥ ४५ ॥

'कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिः' इत्यादिश्रुत्यान्तःकरणस्यैव सुखदुःखाद्याश्रयत्वाभिधानात् 'असङ्गो ह्ययं पुरुषः' इति जीवस्योदासीनत्वश्रवणादन्तःकरणोपाधिभेदादेव सुखादिव्यवस्थोपपद्यत इति मतेन समाधत्ते— **अन्तःकरणस्येति** । कथं तर्ह्यात्मन्यहं सुखीत्यादिभोक्तृत्वादिप्रत्ययः? अभीषणायामपि रज्जौ भीषणसर्पतादात्म्यारोपेणायं भीषण इत्यभिमानवदसङ्गात्मनि भोक्तृहंकारतादात्म्यारोपाद्भोक्तृत्वाद्यभिमानोपपत्तेरिति भावः ॥ ४५ ॥

अन्ये तु चिदाभासः
सुखदुःखाद्याश्रयस्ततः सेति ।
अन्तःकरणविशिष्ट-
स्तदाश्रयस्तेन सेत्यपरे ॥ ४६ ॥

जडस्य भोक्तृत्वानुपपत्तेः अन्तःकरणाध्यस्तश्चिदाभास

एव बन्धाश्रयः । अतस्तत्तद्भेदादिव्यवस्थेति मतान्तरमाह— **अन्ये त्विति** । चिदाभासाभेदाध्यासात् कूटस्थसंसाराभिमानः, स एव बन्ध इति न बन्धमोक्षवैयधिकरण्यमिति भावः । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्यन्तःकरणादिविशिष्टस्य भोक्तृत्वादिश्रवणादन्तःकरणभेदेन तद्विशिष्टभेदादिव्यवस्थेति मतान्तरमाह— **अन्तःकरणेत्यादेना** । न चैवं विशिष्टस्य बन्धः शुद्धस्य मोक्ष इति वैयधिकरण्यम् । विशिष्टगतस्य बन्धस्य विशेष्येऽन्वयाभावाद्विशिष्टस्यानतिरेकादिति भावः ॥ ४६ ॥

भोक्तृमनःसांनिध्या-
दात्मनि भोक्तृत्वमन्यदध्यस्तम् ।
तदुपाधिभेदतस्त-
द्व्यवस्थितिः साधुरित्यन्ये ॥ ४७ ॥

जपाकुसुमोपाधिसांनिध्यात् स्फटिके लौहित्यान्तरवत् भोक्त्रन्तःकरणोपाधिसांनिध्यात् शुद्धेऽप्यात्मनि भोक्तृत्वान्तरमध्यस्तमस्ति । तस्यैकत्वेऽपि तदुपाधिभेदात् सुखादिव्यवस्थोपपन्नेति मतान्तरमाह— **भोक्तृमन इति** । न च अन्यभेदादन्यत्र विरुद्धधर्मव्यवस्था न युज्यत इति वाच्य-

म् । मूलाग्ररूपोपाधिमात्रेण वृक्षे संयोगतदभावदर्शनादिति भावः ॥ ४७ ॥

इतरे त्वेकस्मिन्नपि
शुद्धे भेदप्रकल्पनास्तीति ।
आश्रयभेदादेव
प्रकृते सुवचा व्यवस्थेति ॥ ४८ ॥

आश्रयभेदादेव विरुद्धधर्मव्यवस्थेति नियमाभ्युपगमेऽप्येकस्मिन्नेव निष्कृष्टचैतन्ये उपाधिभेदेन भेदकल्पना संभवतीति मणिमुकुराद्युपाधिकल्पितप्रतिबिम्बरूपाश्रयभेदादवदातश्यामत्वादिव्यवस्थेव प्रकृतेऽपि कल्पिताश्रयभेदेन सुखदुःखादिव्यवस्था सुवचेति मतान्तरमाह——इतरे त्विति ॥

---

१०. जीवानां सुखाद्यननुसंधानप्रयोजकोपाधिवादः ।

एवमुपाधिवशेन
व्यवस्थितिर्यदि भवतु नामैवम् ।

तदननुसंधाने कः
प्रयोजकः स्यादुपाधिरत्राहुः ॥ ४९ ॥

एवमुपाधिभेदेन सुखदुःखादिव्यवस्थासंभवमुपपाद्य जीवानां परस्परं सुखाद्यननुसंधाने प्रयोजकोपाधिं पृच्छति—एवमिति ॥ ४९ ॥

भोगायतनभिदाननु-
संधानस्य प्रयोजिकेत्येके ।
विश्लेषशालिभोगा-
यतनभिदा तत्प्रयोजिकेत्यपरे ॥ ५० ॥

उक्तमाह—भोगायतनेति । ननु हस्तपादादिशरीरावयवानां भोगायतनत्वाविशेषात् तद्भेदोऽप्यननुसंधाने, प्रयोजकः स्यात्; न च इष्टापत्तिः । तथात्वे पादलग्नकण्टकोद्धाराय हस्तव्यापारो न स्यात् । हस्तावच्छिन्नस्य वेदनाननुसंधानादिति चेत्, न । हस्तावच्छिन्नस्य तदननुसंधानेऽप्यवयवावयविनोः पादशरीरयोरभेदसत्त्वेन पादावच्छिन्नवेदनावानहमिति शरीरावच्छिन्नस्यानुसंधानाद्धस्तव्यापारोपपत्तेरिति भावः । हस्तावच्छिन्नस्यापि चरणावच्छिन्नवेदनाननुसंधानमभ्युपगम्य मतान्तरमाह— विश्लेषशालीत्यादिना । अत्र विश्लेषशब्देन

एकस्मिन्नवयविनि घटकत्वेनाननुप्रविष्टत्वं विवक्षितम् । तेन मातृगर्भस्थशरीरयोर्विश्लिष्टतया न गर्भस्थस्य मातृसुखानुसंधानप्रसङ्गः । हस्तपादयोस्तु संश्लिष्टत्वेन तदवच्छिन्नयोः परस्परानुसंधानमिष्टमेवेति भावः ॥ ५० ॥

इतरे शरीरभेद-
स्तथेति केचिन्मनोभिदैवमिति ।
अज्ञानभेद एव
प्रयोजकः स्यादिहेत्यके ॥ ५१ ॥

मतान्तरमाह—इतर इति । तथा, प्रयोजक इत्यर्थः । नन्ववयवोपचयादिना शरीरभेदात् कथं यौवने बाल्यसुखाद्यनुसंधानमिति चेत्, न । ऐन्द्रजालिकशरीरादाविव सर्वत्र मायैवोपचयादिकल्पनौचित्यात् तत्कल्पितोपचयादेः शरीरभेदकत्वायोगादिति भावः । प्रागुक्तान्तःकरणभेद एव प्रयोजक इति मतान्तरमाह— केचिन्मनोभिदेति । एवं प्रयोजक इत्यर्थः । पूर्वोक्ताज्ञानभेद एव प्रयोजक इति मतान्तरमाह— अज्ञानेति ॥ ५१ ॥

तस्माज्जडस्य जगतो
मिथ्यात्वाद्देहिनां पराभेदात् ।

मानान्तराविरोधा-
द्ब्रह्मणि वेदान्तसंगतिः सिद्धा ॥ ५२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्र-
पूज्यपादशिष्य श्रीसदाशिवब्रह्मेन्द्रविरचित-
वेदान्तसिद्धान्तकल्पवल्ल्यां
द्वितीयः स्तबकः समाप्तः ॥

प्रासङ्गिकं परिसमाप्य प्रपञ्चितं प्रकृतमविरोधमुपसंहृत्य पूर्वस्तबकसिद्धसमन्वयेन संगमयति— **तस्मादिति** ॥५२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्परमशिवेन्द्रपूज्यपाद-
शिष्यश्रीसदाशिवब्रह्मेन्द्रप्रणीतश्रीवेदान्तसिद्धान्त-
कल्पवल्लीव्याख्यायां केसरवल्ल्याख्यायां
द्वितीयः स्तबकः ॥



तृतीयस्तबकः ॥

१. कर्मणां विद्योपयोगप्रकारवादः ।

ज्ञानेनैव ब्रह्म-
प्राप्तिः कथमन्यतोऽपि तत्स्मरणात् ।
नान्यानुपयोगात्त-
त्प्राप्तावज्ञाननाशरूपायाम् ॥ १ ॥

प्रथमस्तबकेन सर्ववेदान्तानामद्वितीये ब्रह्मणि समन्वये द्वितीयेन तदविरोधे समर्थिते तादृशब्रह्मप्राप्तौ ज्ञानमेव साधनं नान्यदिति समर्थनाय शङ्कते—**ज्ञानेनैवेति**। अन्यतः, ज्ञानादन्येन कर्मणेत्यर्थः। **तत्स्मरणादिति**, 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति कर्मणा ब्रह्मप्राप्तिस्मरणादित्यर्थः। विस्मृतकण्ठचामीकरस्येव नित्यप्राप्तस्य ब्रह्मणोऽज्ञाननिरासरूपायां तत्प्राप्तौ ज्ञानमात्रस्योपयोगेन तदन्यस्य कर्मणोऽनुपयोगान्नैवमिति परिहरति— **नान्यानुपयोगादित्यादिना**। 'नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुत्या साधनान्तरप्र-

तिषेधात् । स्मृतेश्च ब्रह्मावाप्तौ कर्मणः परंपरासाधनत्वपरत्वान्न विरोध इति भावः ॥ १ ॥

कर्मनिकरोपयोगं
वाचस्पतिराह वेदनेच्छायाम् ।
जगुरिष्यमाण एव
ज्ञाने तं विवरणानुगताः ॥ २ ॥

क्व तर्हि कर्मणामुपयोग इत्यत आह— **कर्मेति** । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इत्यादिश्रुतेर्यज्ञादीनां कर्मणां सन्प्रत्ययार्थत्वेन प्रधानभूतायां वेदनेच्छायामुपयोग इत्यर्थः । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति सामान्यन्यायादिच्छाविषयतया शब्दबोध्य एव वस्तुनि शाब्दसाधनतान्वय इति स्वर्गकामवाक्ये क्लृप्तविशेषन्यायस्य बलीयस्त्वादिष्यमाणे ज्ञान एव यज्ञादीनामुपयोग इति मतान्तरमाह— **जगुरित्यादिना** । तं उपयोगमित्यर्थः ॥ २ ॥

---

२. आश्रमकर्मणामेव विद्योपयोगवादः ।

तत्राश्रमविहितानाम्
मुपयोगं कर्मणां विदुः केचित् ।
अन्ये कल्पतरूक्त्या
विधुरकृतानामपीममभिदधति ॥ ३ ॥

श्रुतौ वेदानुवचनग्रहणं ब्रह्मचारिकर्मणाम्, यज्ञदानग्रहणं गृहस्थकर्मणाम्, तपोऽनाशग्रहणं वानप्रस्थकर्मणामुपलक्षणमिति आश्रमकर्मणामेव विद्योपयोगः न विधुराद्यनुष्ठितकर्मणामिति मतं दर्शयति—तत्रेति । 'अन्तरा चापि तु तद्दृष्टेः' इत्यधिकरणभाष्ये विधुराद्यनुष्ठितजप्यादिकर्मणामपि विद्योपयोगोक्त्या 'विहितत्वाच्चाश्रमकर्मापि' इति सूत्रे आश्रमग्रहणं त्रैवर्णिकोपलक्षणमिति कल्पतरूक्त्या च विधुरकृतानामपि कर्मणामुपयोग इति मतान्तरमाह—अन्य इत्यादिना । इमम् उपयोगमित्यर्थः ॥ ३ ॥

तत्रापि क्लृप्तफलतो
नित्यानामेव कर्मणामितरे ।
काम्यानामपि तेषां
संयोगपृथक्त्वनयतोऽन्ये ॥ ४ ॥

तेष्वपि नित्यानामेव कर्मणामुपयोगः, क्लृप्तस्य तत्फलस्यैव दुरितक्षयस्य विद्ययापेक्षणात् । प्रकृतौ क्लृप्तोपकारकाणामङ्गानां विकृताविव द्वारान्तरकल्पनालाघवेन यज्ञादिश्रुतेः काम्यसाधारण्यायोगादिति मन्यमानानां मतान्तरमाह— **तत्रेति** । उपयोगमाहुरित्यध्याहारः । नात्र प्राकृताङ्गन्यायः । किंतु विकृत्युपदिष्टाङ्गन्यायेन विनियोगोत्तरकालमुपकारद्वारकल्पनात्काम्यादीनामपि संयोगपृथक्त्वन्यायेन विविदिषोपयोगसंभव इति मतान्तरमाह— **काम्यानामित्यादिना** । अत्रापि पूर्ववदध्याहारः ॥ ४ ॥

---

३. संन्यासस्य विद्याविनियोगवादः ।

तर्हि कया वा द्वारा
संन्यासस्योपयुक्तिराचक्ष्व ।
कर्माविनाश्यदुरित-
ध्वंसद्वारेति चक्षते केचित् ॥ ५ ॥

कर्मणां ज्ञानोपयोगं प्रदर्श्य संन्यासस्य तं दर्शयितुं पृच्छति— **तर्हीति** । उपयुक्तिः उपयोग इत्यर्थः । 'संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इति श्रुतेः कर्मवदुरितक्षयलक्षणचित्तशुद्धिद्वारैव

संन्यासस्योपयोग इति मतेन समाधत्ते— **कर्माविनाश्ये-त्यादिना**। कर्मभिरेव दुरितक्षयसिद्धेः संन्यासवैयर्थ्यमि-त्याशङ्कापरिहारार्थं कर्माविनाश्येति दुरितविशेषणम् ॥ ५ ॥

केचिददृष्टद्वारा तस्याः
श्रवणाङ्गतामाहुः।
दृष्टद्वारा त्वपरे
विक्षेपाभावलक्षणया ॥ ६ ॥

मतान्तरमाह—**अदृष्टेति**। 'शान्तो दान्तः' इति श्रुता-वुपरतिशब्दितस्य संन्यासस्य श्रवणाद्यङ्गसाधनचतुष्टयान्तर्भा-वदर्शनात् संन्यासपूर्वकत्वावश्यकत्वादिति भावः। मतान्तर-माह—**दृष्टेति**। दृष्टे संभवति अदृष्टकल्पनायाः अन्याय्यत्वा-द्विक्षेपाभावस्यावहितबुद्धिसाध्ये सर्वत्र लोकत एवाङ्गत्वसिद्धेः वचनाद्वैधसंन्यासलक्षणो विक्षेपाभावो नियम्यत इति भावः ॥ ६ ॥

संन्यासे त्वधिकारं
ब्राह्मणवत्क्षत्रवैश्ययोरेके।
ब्राह्मणजातेरेव
प्राहुस्तं नान्ययोरितरे ॥ ७ ॥

संन्यासस्य ज्ञानोपयोगं द्वेधा प्रदर्श्य तदधिकारिणं निरूपयति— **संन्यासे त्विति** । 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इत्यादिश्रुतौ सामान्यतः क्षत्रियादिसाधारण्येन संन्यासविधानादिति भावः । 'ब्राह्मणो निर्वेदमायात्' 'ब्राह्मणो व्युत्थाय' 'ब्राह्मणः प्रव्रजेत्' इत्यादिसंन्यासविधिषु ब्राह्मणग्रहणात्, 'अधिकारिविशेषस्य ज्ञानाय ब्राह्मणग्रहः । न संन्यासविधिर्यस्माच्छ्रुतौ क्षत्रियवैश्ययोः' इति वार्तिकोक्तेश्च ब्राह्मणस्यैव संन्यासेऽधिकारः, न क्षत्रियवैश्ययोः । तयोस्तु संन्यासं विनैव श्रवणाद्यधिकारितेति मतान्तरमाह— **ब्राह्मणजातेरित्यादिना** ॥ ७ ॥

---

४. श्रवणाधिकारवादः ।

संन्यासिन एव परं
श्रवणाद्यधिकारिता मुख्या ।
गौणी राजन्यादे-
र्जन्मान्तरसंभवत्फलेत्यपरे ॥ ८ ॥

'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुतेः 'आ सुप्तेरा मृतेः कालं नयेद्वेदान्तचिन्तया' इति स्मृतेश्च अनन्यव्यापारतालक्ष-

णब्रह्मसंस्थाशालिसंन्यासिन एव श्रवणाद्यधिकारिता मुख्या। स्वाश्रमधर्मव्यग्रक्षत्रियादेरनन्यव्यापारतासंभवात् जन्मान्तरीयविद्याप्रापिका श्रवणाद्यधिकारिता गौणीति मतान्तरमाह —संन्यासिन एवेति ॥ ८ ॥

---

५. श्रवणस्यामुख्याधिकारिकृतस्य जन्मान्तरीयज्ञानोपयोगित्ववादः ॥

ननु कथमस्तु श्रवणं
जन्मान्तरभावि बोधफलम् ।
दृष्टफलकत्वकल्पे-
रमुष्य चादृष्टजनकतायोगात् ॥ ९ ॥

ननु सर्वत्र विचारस्य तात्कालिकविचार्यनिर्णयफलकत्वकल्पेः क्षत्रियादिश्रवणं कथं जन्मान्तरीयब्रह्मनिर्णयफलकम्। न च विधिबलात् कथंचिदृष्टद्वारकल्पनेन तत्फलकत्वसिद्धिस्तस्येति वाच्यम्। साङ्गस्यैवादृष्टजनकतया तस्य संन्यासरूपाङ्गवैकल्येनादृष्टजनकत्वासिद्धेरिति शङ्कते— नन्विति ॥ ९ ॥

यज्ञाद्यपूर्वमेव
श्रवणस्य स्वकारितस्य विद्यायाम् ।

जन्मान्तरभाविन्या-
मप्युपकारित्वघटकमित्याहुः ॥ १० ॥

अमुख्याधिकारिणाप्युत्पन्नविविदिषेण क्रियमाणं श्रवणं द्वारीभूतविविदिषोत्पादकप्राचीनविद्यार्थयज्ञाद्यनुष्ठानजन्यापूर्वप्रयुक्तमिति तदेवापूर्वं विद्यारूपफलपर्यन्तं व्याप्रियमाणं जन्मान्तरीयायामपि विद्यायां स्वकारितस्य श्रवणस्योपकारं घटयतीति श्रवणस्यादृष्टार्थत्वेऽपि नानुपपत्तिरिति परिहरति —यज्ञादीति ॥ १० ॥

यावद्ब्रह्मज्ञानो-
दयमाचरितं पुनः पुनः श्रवणम् ।
नियमादृष्टं जनय-
त्यतो न दोष इति विवरणाचार्याः ॥

श्रवणनियमविधिपक्षेऽपि ब्रह्मज्ञानोत्पत्तिपर्यन्तं पुनः पुनः क्रियमाणं श्रवणं नियमादृष्टं जनयति, न ततः प्राक् । अतस्तद्बलात् श्रवणस्य जन्मान्तरीयज्ञानफलकत्वं न विरुद्धमिति मतान्तरमाह—यावदिति ॥ ११ ॥

कृच्छ्राशीतिफलोक्तेः
श्रवणमपूर्वं क्रमेण जनयित्वा ।

तद्द्वारा भाविफलं
जनयेदिति केचिदभिदधति ॥ १२ ॥

'दिने दिने च वेदान्तश्रवणाद्भक्तिसंयुतात् । गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेत्' इति स्मृत्या श्रवणस्य कृच्छ्राशीतिफलोक्तेः प्रतिदिनमनुष्ठितं श्रवणमपूर्वद्वारा जन्मान्तरे ज्ञानं जनयतीति मतान्तरमाह—कृच्छ्रेति । यथाग्न्यर्थस्याप्याधानस्य पुरुषसंस्कारेषु परिगणनात् पुरुषार्थत्वम्, तथा दृष्टस्यापि श्रवणस्य दिने दिने चेत्यादिवचनबलाददृष्टार्थत्वमपि संभवतीति भावः ॥ १२ ॥

---

६. निर्गुणस्याप्युपास्यत्ववादः ।

विद्यारण्यमुनीन्द्राः
श्रवणस्येवात्मविद्यायाम् ।
निर्गुणविषयोपास्ते-
र्मुख्यामुपकारितामाहुः ॥ १३ ॥

इत्थं श्रवणादेरेव ज्ञानसाधनत्वे निरूढेऽपि श्रवणादिवन्निर्गुणब्रह्मोपास्तेरपि तत्साधनत्वमिति मतं दर्शयति—

विद्यारण्येति । प्रश्नोपनिषदि 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' इति निर्गुणोपासनां प्रकृत्य अनन्तरं 'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते' इति तत्समानकर्मसाक्षात्कारफलकीर्तनादिति भावः ॥ १३ ॥

---

७. ब्रह्मसाक्षात्कारकारणवादः ।

अथ किं साक्षात्कारे
करणं ब्रह्मैकगोचरे ब्रूहि ।
ब्रुवते केचित् प्रत्यय-
पौनःपुन्यं प्रसंख्यानम् ॥ १४ ॥

ब्रह्मसाक्षात्कारप्रमासाधकेषु निर्णीतेषु तत्साधकतमनिर्णिनीषया पृच्छति— अथ किमिति । उत्तरमाह— ब्रुवत इत्यादिना । विधुरकामिनीसाक्षात्कारे करणत्वेन कल्पस्य प्रत्ययावृत्तिलक्षणस्य प्रसंख्यानस्य कल्पप्रमाणानन्तर्भावेऽपि तज्जन्यसाक्षात्कारस्येश्वरमायावृत्तिज्ञानवदर्थाबाधमात्रेण प्रमात्वसंभवादिति भावः ॥ १४ ॥

अपरे तु मनो हेतु-
स्तत्सहकारि प्रसंख्यानम् ।

तस्य करणत्वक्लृप्ते-
रहमनुभूताविति प्राहुः ॥ १५ ॥

'मनसैवानुद्रष्टव्यम्' इति श्रुतेः मन एव साक्षात्कारे करणम्। प्रसंख्यानं तु तत्सहकारिमात्रम्। मनसश्च अहंकारोपहितसाक्षात्कारे 'अहमेवेदꣳ सर्वोऽस्मीति मन्यते' इति श्रुत्युपदर्शितस्वाप्रब्रह्मसाक्षात्कारे करणत्वक्लृप्तेरिति मतान्तरमाह—अपरे त्विति ॥ १५ ॥

इतरे तु महावाक्यं
प्राहुरसाधारणो हेतुः।
यन्मनसेति निषेध-
श्रवणान्न मनोऽत्र हेतुरिति ॥ १६ ॥

'तद्धास्य विजज्ञौ, तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' इत्यादिश्रुतिष्वाचार्योपदेशानन्तरमेव साक्षात्कारोदयाभिधानात्, 'वेदान्तविज्ञानसुनिश्चितार्थाः' 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यादिश्रुतिषु च ब्रह्मण उपनिषदेकवेद्यत्वस्य प्रतिपादनाच्च, ब्रह्मसाक्षात्कारे महावाक्यमेव करणम्, न तु मनः, 'यन्मनसा न मनुते' इत्यादितत्करणत्वप्रतिषेधश्रवणादिति मतान्तरमाह— इतरे

लिति । 'मनसैवानुद्रष्टव्यम्' इत्यादिश्रुतिस्तु साक्षात्कारे हेतुत्वमात्रपरा न तु कारणत्वपरा, तावतैव मनसेति तृतीयाया उपपत्तेरिति भावः ॥ १६ ॥

---

८. शाब्दापरोक्षवादः ।

साक्षात्कारं जनयेत्
प्रत्ययसंतानसहकृतं वाक्यम् ।
अग्निविशेषोपेतो
होम इवापूर्वमित्यपरे ॥ १७ ॥

ननु वाक्यस्य परोक्षज्ञानजनकत्वकल्पनेः कथमपरोक्षज्ञानजनकत्वमित्याशङ्क्य स्वतः परोक्षज्ञानजननसमर्थमपि वाक्यं वैधाग्न्यधिकरणसहकृतो होमोऽपूर्वमिव विहितभावनाप्रचयसहकृतं सत् अपरोक्षज्ञानमपि जनयतीति मतान्तरमाह—साक्षात्कारमिति । औपनिषदे ब्रह्मणि मानान्तराप्रवृत्तेः परोक्षज्ञानेनापरोक्षभ्रमनिवृत्त्ययोगाच्छब्दादपरोक्षज्ञानानुदयेऽनिर्मोक्षप्रसङ्ग इति भावः ॥ १७ ॥

ध्यानाभ्याससहाया-
न्मनसो नष्टेष्टवस्तुविषयेव ।

साक्षात्कृतिरिह युक्ता
वाक्याद्ब्रह्मावलम्बिनीत्यपरे ॥ १८ ॥

बहिरसमर्थादपि भावनाप्रचयसहितादन्तःकरणान्नेष्टेष्टकामिन्यादिवस्तुविषयकसाक्षात्कारो दृष्ट इति तद्वदिहापि निदिध्यासनप्रचयसहकृताद्वाक्यादेव ब्रह्मविषयकः साक्षात्कारो युक्त इति दृष्टानुरोधेन समर्थयमानानां मतमाह— ध्यानेति ॥ १८ ॥

अन्ये तु संगिरन्ते
स्वत एव ब्रह्मणोऽपरोक्षतया ।
तद्विषयं हि ज्ञानं
वाक्यजमपरोक्षमेव भवतीति ॥ १९ ॥

ज्ञानापरोक्ष्ये विषयापरोक्ष्यमेव प्रयोजकम्, न करणविशेषः । विषयापरोक्ष्यं च वृत्तिद्वारकं स्वाभाविकं वा । तत्र 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुतेः ब्रह्मणः स्वभावत एवापरोक्षत्वेन तद्विषयकं ज्ञानं वाक्याज्जायमानमपरोक्षमेव भवतीति मतान्तरमाह— अन्ये त्विति ॥ १९ ॥

स्फुटचित्त्वमापरोक्ष्यं
साक्षात्तद्ब्रह्मणोऽस्ति विषयादेः ।

तदभेदाद्गौणमिति
प्रवदन्त्यद्वैतविद्यार्याः ॥ २० ॥

न अपरोक्षवस्तुविषयकत्वं ज्ञानापरोक्ष्यम्, स्वप्रकाशस्वरूपसुखाव्यापनात् । किं तु अभिव्यक्तचित्स्वरूपमेव । तच्च ब्रह्मण एव साक्षादस्ति । विषयादेस्त्वभिव्यक्तचैतन्याभेदाद्गौणमिति मतान्तरमाह—**स्फुटचित्त्वमिति ॥ २० ॥**

---

९. अज्ञाननिवर्तकवादः ॥

अथ चाक्षुषवृत्त्यापि
ब्रह्माज्ञानं निवर्ततामिति चेत् ।
अत्राचार्याश्चाक्षुष-
वृत्तिश्चिद्गोचरैव नेत्याहुः ॥ २१ ॥

नन्वेवं घटादिविषयकचाक्षुषवृत्त्या घटाद्यधिष्ठानब्रह्मचैतन्याभेदाभिव्यक्त्या ब्रह्मावारकमूलाज्ञानं कुतो न निवर्तेत । घटाद्याकारवृत्तेरप्यभिव्यक्तचिदंशे मूलाज्ञानसमानविषयकत्वसत्त्वादिति शङ्कते— **अथ चाक्षुषेति** । न चाक्षुषवृत्तिश्चैतन्यविषयिणी 'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति

कश्चनैनम्' इत्यादिश्रुत्या चैतन्यस्य परमाणुवच्चक्षुराद्ययोग्यत्वादिति मतेन परिहरति— अत्रेत्यादिना ॥ २१ ॥

चिद्विषयिण्यपि सा न
ब्रह्माज्ञानस्य वारिका किं तु ।
वेदान्तजैव वृत्तिः
श्रुतिनियमादृष्टसहकृतेत्यपरे ॥ २२ ॥

अस्तु घटादिचाक्षुषवृत्तिरपि चिद्विषयिणी, तथापि सा न ब्रह्मावारकमूलाज्ञाननिवृत्तिहेतुः । किं तु श्रवणनियमादृष्टसहकृतवेदान्तवाक्यजन्यवृत्तिरेवेति मतान्तरमाह—चिद्विषयिणीति ॥ २२ ॥

वाक्योद्भवैव वृत्तिः
स्वरूपसंबन्धभेदेन ।
ब्रह्माज्ञानं क्षपये-
न्न तु चाक्षुषवृत्तिरित्यपरे ॥ २३ ॥

प्रत्यग्ब्रह्माभेदगोचरा 'तत्त्वमसि' इत्यादिवाक्यजन्यैव वृत्तिः पदार्थशोधनासहितस्वरूपसंबन्धविशेषेण तदभेदगोचरं मूलाज्ञानं निवर्तयेत्, न तु चाक्षुषवृत्तिरिति मतान्तरमाह—वाक्येति ॥ २३ ॥

अथ निजहेतुमविद्यां
विद्या विनिवर्तयेत्कथं नाम ।
इह केचन वेणूत्थित-
वह्निज्वालेव वेणुमित्याहुः ॥ २४ ॥

ननु प्रत्यगभिन्नब्रह्माकारा वृत्तिः स्वहेतुभूतामविद्यां कथं निवर्तयेदित्याशङ्क्य नायं नियमः, साक्षाद्वेणुजन्याया अप्यग्निज्वालायास्तद्विरोधित्वदर्शनादिति परिहरति— अथेति । घटादिज्ञानेषु समानविषयकाज्ञानबाधकत्वस्य कल्पत्वाच्चेति भावः ॥ २४ ॥

---

१०. ब्रह्माकारवृत्तिनाशकवादः ।

अज्ञानोन्मूलनकं
ज्ञानं वृत्त्यात्मकं कथं नश्येत् ।
अत्राहुः कतकरजो-
न्यायात्स्वयमेव नश्यतीत्येके ॥ २५ ॥

तप्तायःपतितपयो-
न्यायमिहोदाहरन्त्यन्ये ।

दग्धतृणकूटदहनो-
दाहरणं केचिदत्राहुः ॥ २६ ॥

ननु स्वकार्याविद्यानिवर्तकवृत्तेः केन निवृत्तिः? वृत्त्यन्तरेणेति चेदनवस्था। अनिवृत्तौ तु तयैव वृत्त्या द्वैतापत्तिरित्यर्धेनाशङ्क्य, तत्र मतत्रयोक्तदृष्टान्तत्रयेण सार्धश्लोकेन परिहरति—**अज्ञानेति**। यथा वारिक्षिप्तकतकरेणुस्तद्गतं पङ्कं निवर्त्य स्वयमप्यन्यानपेक्षो निवर्तते, यथा तप्तायःपिण्डनिक्षिप्तो जलबिन्दुः तद्गतं भस्म क्षालयित्वा स्वयमपि शुष्यति, यथा वा तृणकूटं दग्ध्वा वह्निर्भूमौ स्वयमेव शाम्यति, तथा अखण्डाकारवृत्तिरज्ञानं दग्ध्वा ब्रह्मणि स्वयमेव शाम्यतीत्यर्थः ॥

वृत्त्यारूढः साक्षी
शमयेत्सविलासमज्ञानम्।
आरुह्य सूर्यकान्तं
दहति तृणं रविकरो यथेत्येके ॥ २७ ॥


उक्तदृष्टान्तेषु कालादृष्टादिकारणान्तरसंभवेन तद्वैषम्यमाशङ्क्य मतान्तरमाह—**वृत्तीति**। वृत्त्यभिव्यक्तं ब्रह्मैव अज्ञानं तदन्तर्गतां वृत्तिं च नाशयति। यथा सूर्यकान्तशिलासूर्यकरः तृणं दहति, तद्वदित्यर्थः। तथा च न [illegible]ति भावः ॥ २७ ॥

अज्ञानमेव साक्षा-
ज्ज्ञानान्नश्यति जगत्तु तन्नाशात् ।
जीवन्मुक्तिरपीत्थम-
विद्यालेशेन घटत इत्यन्ये ॥ २८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्र-
पूज्यपादशिष्य श्रीसदाशिवब्रह्मेन्द्रविरचित-
वेदान्तसिद्धान्तकल्पवल्ल्यां
तृतीयः स्तबकः समाप्तः ॥

न तावत् ज्ञानात् सविलासाज्ञाननाशः, तथात्वे प्रारब्ध-स्यापि नाशग्रस्तत्वेन जीवन्मुक्त्ययोगात् । किं तु परस्परविरोधात् ज्ञानादज्ञानमात्रं नश्यति, प्रपञ्चस्तूपादाननाशात् । एवं च उपादानमन्तरेण कार्यस्थित्ययोगात् जीवन्मुक्तिसिद्धये प्रारब्धकर्मणा तच्छरीराद्युपादानाविद्यालेशनाशः प्रतिबध्यत इत्यविद्यालेशेन जीवन्मुक्तिरप्युपपद्यत इत्याशयेन मतान्तरमाह—**अज्ञानमिति ॥ २८ ॥**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्परमशिवेन्द्रपूज्यपाद-
शिष्यश्रीसदाशिवब्रह्मेन्द्रप्रणीतश्रीवेदान्तसिद्धान्त-
कल्पवल्लीव्याख्यायां केसरवल्ल्याख्यायां
तृतीयः स्तबकः ॥



चतुर्थस्तबकः ॥

१. अविद्यालेशवादः ।

कोऽयमविद्यालेशो
जीवन्मुक्तिर्हि यदनुषङ्गेण ।
अत्राचख्युः कतिचिद-
विद्याविक्षेपशक्तिरेष इति ॥ १ ॥

एवं मुक्तिसाधने निर्णीते तत्फलनिरूपणं प्रकृतजीवन्मुक्तिनिर्वाहकाविद्यालेशपरीक्षामुखेनारभते— कोऽयमिति । ज्ञानेनाविद्याया आवरणशक्त्यंश एव नश्यति ; विक्षेपशक्त्यंशस्तु प्रारब्धेन प्रतिबद्धत्वान्न नश्यति । स एष एवाविद्यालेश इति मतेनोत्तरमाह— अत्येत्यादिना ॥ १ ॥

अपरे क्षालितमदिरा-
घटगन्धसमैव वासना स इति ।
अन्ये स दग्धवासो-
न्यायादनुवृत्तिभागविद्येति ॥ २ ॥

'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्यमात्रतः । अविद्या सह कार्येण नासीदस्ति भविष्यति' इति वार्तिककृद्विरोधमाशङ्क्य मतान्तरमाह— **अपर इति** । निराश्रयवासनावस्थानायोगमाशङ्क्य मतान्तरमाह— **अन्ये स इत्यादिना** । सः अविद्यालेश इत्यर्थः ॥ २ ॥

सर्वज्ञात्ममुनीन्द्रा-
स्त्वाहुर्ब्रह्मात्मविज्ञानात् ।
स्वाविद्याविनिवृत्तौ
नाविद्यालेशसंभवोऽस्तीति ॥ ३ ॥

विरोधिज्ञानोदयेऽविद्यायाः निवृत्तौ लेशतोऽपि तस्याः शेषो न संभवति, तत्संभवे तन्नाशाय ज्ञानान्तरकल्पने तस्यैव लाघवादविद्यानाशकत्वौचित्यादिति मतान्तरमाह— **सर्वज्ञेति** । 'तस्य तावदेव चिरम्' इति श्रुतेरात्मज्ञानप्रशंसार्थत्वेन जीवन्मुक्तौ तात्पर्याभावादर्थवादमात्रत्वादिति भावः ॥

---

२. अविद्यानिवृत्तिस्वरूपवादः ।

अथ केयमविद्याया
विनिवृत्तिर्नाम तच्छृणुत ।

ब्रह्मैव नातिरिक्ता
सेत्याहुर्ब्रह्मसिद्धिकाराद्याः ॥ ४ ॥

तत्राविद्यानिवृत्तिरूपज्ञानफलस्वरूपनिर्णयाय पृच्छति— **अथेति** । नित्यसिद्धस्य ब्रह्मस्वरूपस्यासत्त्वापादकत्वाद-विद्यैवाभावः । तन्निवृत्तिश्च ब्रह्मस्वरूपैवेति मतेनोत्तरमाह— **ब्रह्मैवेत्यादिना** । तथा च यस्मिन् सति यत्सत्त्वं यदभावे च यदभावः तत् तत्र कारणमिति, ज्ञानस्य ब्रह्मस्वरूपमुक्तिं प्रति योगक्षेमसाधारणहेतुत्वं संभवतीति भावः ॥ ४ ॥

आनन्दबोधगुरवो-
ऽविद्याविनिवृत्तिरात्मनो भिन्ना ।
सदसत्सदसन्मिथ्या-
प्रकारभिन्नप्रकारिकेत्याहुः ॥ ५ ॥

आत्मान्यैवाविद्यानिवृत्तिः । सा च न सती, द्वैतापत्तेः ; नाप्यसती, ज्ञानसाध्यत्वायोगात् ; नापि सदसती, विरोधात् ; नाप्यनिर्वाच्या, अनिर्वाच्यस्योपाधेरज्ञानापादकत्वनियमेन मुक्तावपि तदनुवृत्तिप्रसङ्गात्, ज्ञानानिवर्त्यत्वापत्तेश्च । किं तु उक्तप्रकारचतुष्टयातिरिक्तप्रकारेति मतान्तरमाह— **आनन्दबोधेति** ॥ ५ ॥

अद्वैतबोधगुरव-
स्त्वात्मज्ञानैककालीना ।
विनिवृत्तिरविद्यायाः
क्षणिका सा भावविक्रियेत्याहुः ॥ ६ ॥

अस्त्वनिर्वचनीयैव सा, तथापि नोपादानाविद्यालेशप्रसक्तिः । उत्पत्तिद्वितीयक्षणे उत्पन्नोऽयं घटः नोत्पद्यत इति उत्पत्तेरवर्तमानत्ववत् निवृत्त्यनन्तरमपि द्वितीयक्षणे निवृत्तोऽयं न निवर्तते इति व्यवहारेण निवृत्तेरप्यवर्तमानत्वेन क्षणिकभावविकारविशेषरूपत्वम् । तथा च अविद्यानिवृत्तिरात्मज्ञानोदयानन्तरक्षणवर्तिनी भावविक्रियेति न कश्चिद्दोष इति मतान्तरमाह— अद्वैतेति ॥ ६ ॥

---

३. मुक्तिस्वरूपवादः ।

नन्वज्ञाननिवृत्तेः
क्षणिकत्वान्मुक्तिरस्थिरा स्याचेत् ।
ब्रह्मानन्दस्फुरणं
दुःखाभावश्च मुक्तिरित्याहुः ॥ ७ ॥

नन्वेवमविद्यानिवृत्तेः क्षणिकत्वे मोक्षस्य स्थिरपुरुषार्थत्वं न स्यादित्याशङ्क्य नाविद्यानिवृत्तिः स्वतः पुरुषार्थः, तस्याः सुखदुःखाभावान्यतरत्वाभावात् । किं तु अखण्डानन्दस्फुरणं संसारदुःखोच्छेदश्च । तदुपयोगितया च तस्यास्तत्त्वज्ञानसाध्यत्वमुपेयत इति केषांचिन्मतेन परिहरति— **नन्विति** ॥

ननु तस्याः क्षणिकत्वे
मुक्तिर्न स्थिरपुमर्थ इति मैवम् ।
सुखदुःखाभावान्यत-
रत्वाभावान्न हि तथेत्याहुः ॥ ८ ॥

एतच्छ्लोकार्थ एव पुनः श्लोकान्तरेणोच्यते—**ननु तस्या इति** ॥ ८ ॥

चित्सुखचरणास्त्वाहु-
र्दुःखाभावोऽपि न पुमर्थः ।
सुखशेषत्वात्तस्य
स्वरूपसुखमेव तादृगिति ॥ ९ ॥

दुःखाभावो न स्वतः पुरुषार्थः, सर्वत्र दुःखाभावस्य स्वरूपसुखाभिव्यक्तिप्रतिबन्धकाभावतया सुखशेषत्वात् । स्व-

रूपसुखमेव पुरुषार्थ इति मतान्तरमाह—चित्सुखचरणा इति ॥ ९ ॥

---

४. ब्रह्मानन्दस्य प्राप्यत्ववादः ।

नित्यप्राप्तोऽप्ययमा-
नन्दः स्वाविद्यया तिरोभूतः ।
तन्नाशे प्राप्यत इव
कण्ठाभरणं यथेत्याहुः ॥ १० ॥

नन्वयमानन्दः प्रत्यगात्मरूपत्वान्नित्यप्राप्त इति कथं तत्प्राप्तिर्ज्ञानफलमित्याशङ्कायां केषांचिन्मतमाह— नित्येति । एवं च आनन्दस्य गौण्येव प्राप्तिर्ज्ञानफलमिति भावः ॥१०॥

आनन्दो नास्तीति
व्यवहारात्संसृतौ तदप्राप्तिः ।
साविद्यया निवृत्ते-
स्याहुः प्राप्तिं परे मुख्याम् ॥ ११ ॥

संसारदशायां आनन्दो नास्ति न भातीति व्यवहारादावरणप्रयुक्ता काचित्तस्य अप्राप्तिरध्यस्यते । विद्ययावरणनि-

वृत्तौ तत्प्रयुक्ता प्राप्तिर्निवर्तत इत्यप्राप्तिः प्राप्तिश्च मुख्यैवेति मतमाह— आनन्द इति ॥ ११ ॥

आनन्दः संसारे
सन्नपि पारोक्ष्यतो न पुरुषार्थः ।
अपरोक्षतया मुक्ति-
दशायां पुरुषार्थ इत्येके ॥ १२ ॥

संसारदशायां आनन्दस्यावृतत्वेन परोक्षत्वान्न स पुरुषार्थः । मुक्तिदशायां तु आवरणभङ्गेनापरोक्षत्वात् पुरुषार्थो भवतीति मतान्तरमाह— आनन्द इति । न च संसारदशायां आनन्दस्य स्वरूपज्ञानेनापरोक्ष्यमस्ति, तदास्य तदभिन्नत्वादिति वाच्यम् । न हि स्वव्यवहारानुकूलचैतन्याभेदमात्रमापरोक्ष्यम् , येन तथा स्यात् । किं तु अनावृतचैतन्याभेद एव । तथा च अनावृतत्वस्य तदानीमभावेन न दोष इति भावः ॥ १२ ॥

अज्ञानेनाध्यस्त-
श्चैतन्यानन्दयोः पुरा भेदः ।
तन्नाशे भेदलया-
त्तदापरोक्ष्यं भविष्यतीत्यन्ये ॥ १३ ॥

अस्तु स्वव्यवहारानुकूलचैतन्याभेदमात्रमापरोक्ष्यम् । तथापि अज्ञानमहिम्ना जीवभेदवच्चैतन्यानन्दयोर्भेदोऽप्यध्यस्त इति संसारदशायां पुरुषान्तरस्य पुरुषान्तरचैतन्यापरोक्ष्यवदनवच्छिन्नानन्दापरोक्ष्यमपि नास्ति । अज्ञाननाशे तु चिदानन्दभेदविलयात्तदापरोक्ष्यमिति मतान्तरमाह— अज्ञानेति ॥

---

५. मुक्तस्य ब्रह्मभाववादः ।

अथ मुक्त ईश्वरः स्या-
दाहो शुद्धात्मनावशिष्येत ।
अत्रैकजीववादे
स शिष्यते शुद्धरूपेण ॥ १४ ॥

ज्ञानफलप्राप्तौ निर्णीतायां प्राप्यस्वरूपनिर्णयाय पृच्छति— अथेति । तत्र प्रथममेकजीववादेन समाधत्ते—अत्रेत्यादिना । एकजीववादे तदेकाज्ञानकल्पितस्य जीवेश्वरविभागादिकृत्स्नभेदप्रपञ्चस्य तद्विद्योदये विलयान्निर्विशेषचैतन्यरूपेणावशिष्यत इत्यर्थः ॥ १४ ॥

नानाजीवमतेऽपि
प्रतिबिम्बेशानदर्शने तस्य ।
प्रतिबिम्बान्तरभावा-
योगाद्बिम्बात्मनास्ति परिशेषः ॥ १५ ॥

'नानाजीववादेऽपि मायाप्रतिबिम्ब ईश्वर इति मतेऽविद्याप्रतिबिम्बजीवस्य स्वोपाधिविनाशे प्रतिबिम्बान्तरभूतेश्वरभावप्राप्त्ययोगाद्बिम्बभूतशुद्धचैतन्यात्मना परिशेषो भवतीति समाधानान्तरमाह—नानाजीवेति ॥ १५ ॥

बिम्बेश्वरवादे त्वी-
श्वरताप्राप्तिर्विमुक्तस्य ।
आसर्वमुक्त्यमुष्मि-
न्बिम्बत्वापह्नवायोगात् ॥ १६ ॥

अविद्यायामन्तःकरणे वा चित्प्रतिबिम्बो जीवः । बिम्बभूतस्त्वीश्वर इति मते मुक्तस्य यावत्सर्वमुक्तिपरमेश्वरभावापत्तिरिष्यते । यथानेकेषु दर्पणेष्वेकस्य मुखस्य प्रतिबिम्बे सति एकदर्पणापनये तत्प्रतिबिम्बो बिम्बभावेनैवावतिष्ठते, न तु मुखमात्ररूपेण । तदानीमपि दर्पणान्तरसंनिधानप्रयु-

क्तस्य मुखे बिम्बत्वस्यानपायात् । तथा एकस्य ब्रह्मचैतन्यस्यानेकेषूपाधिषु प्रतिबिम्बे सति विद्योदयेनैकोपाधिलये तत्प्रतिबिम्बस्य बिम्बभावेनावस्थानमुचितम्, न तु शुद्धरूपेण । तदानीमप्यविद्यान्तरस्य सत्त्वेनेश्वरे तत्प्रयुक्तबिम्बत्वस्यापह्नोतुमशक्यत्वादिति समाधानान्तरमाह—बिम्बेति । अमुष्मिन् ईश्वर इत्यर्थः । नन्वेवं ज्ञानस्येश्वरभावापत्तिफलकत्वे तस्य दहराद्युपासनाविशेषप्रसङ्ग इति चेत्, न । ज्ञानस्याज्ञाननिवृत्त्यानन्दावाप्तिफलकत्वेन विशेषसत्त्वादिति भावः ॥

परमार्थतस्तु मुक्तः
सर्वेशत्वादिधर्मनिर्मुक्तम् ।
विगलितसर्वविकल्पं
विमलं ब्रह्मैव केवलं भवति ॥ १७ ॥

मुक्तस्य सर्वमुक्तिपर्यन्तं ईश्वरभावापत्तिरपि बद्धपुरुषान्तरदृष्ट्या । वस्तुतस्तु अस्पृष्टेश्वरत्वादिधर्मनिर्मृष्टनिखिलभेदप्रपञ्चनित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वितीयाखण्डैकरसब्रह्मात्मनावस्थानमिति परमसिद्धान्तमाह— परमार्थत इति ॥

इत्थं परमशिवेन्द्रा-
नुग्रहभाजनसदाशिवेन्द्रकृतौ ।

सिद्धान्तकल्पवल्ल्यां
तुर्यः स्तबकश्च संपूर्णः ॥ १८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्र-
पूज्यपादशिष्य श्रीसदाशिवब्रह्मेन्द्रविरचित-
वेदान्तसिद्धान्तकल्पवल्ल्यां
चतुर्थः स्तबकः समाप्तः ॥

स्पष्टोऽर्थः ॥ १८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्परमशिवेन्द्रपूज्यपाद-
शिष्यश्रीसदाशिवब्रह्मेन्द्रप्रणीतश्रीवेदान्तसिद्धान्त-
कल्पवल्लीव्याख्यायां केसरवल्ल्याख्यायां
चतुर्थः स्तबकः ॥
इति सिद्धान्तकल्पवल्ली समाप्ता ॥

